PAGE(S)MISSING

NOT AVAILBLE

1-3

Dwarka Mahatmye
ou
Legende de Dwarka.
par
Prahrad [illegible] ou Zitara

Wanted 2 leaves in the beginning
6 . 268.

This a chapter of the Rahrad Sanvita or Sanvita of Prahrad who composed [illegible] and was a Mahanubhav famed by his religious life.

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

Dwaraka Mahatmyam (121)

महाबाहोत्रातानवनवार्त्तावान्॥४९॥कथंहेत्वयुगेह्यस्मिन्रौद्रेवैकलिसंज्ञिके॥नविष्णोर्
विनाविष्णुनीतानामनयप्रदं॥५०॥यस्मिन्युगेह्यधर्मेणजितोधर्मः॥सनातनः॥अनृतेनजितं
सत्यंविप्राश्चदृष्टषग्लेछिता॥५१॥ब्रह्मणाश्चापिवध्यंतेम्लेछैराजन्यौपिचि॥अस्मिन्विलुलितेधर्मे
वर्णाश्रमविवर्जिते॥५२॥वेदमार्गेविलुप्तेतुकविष्णुर्भगवानिति॥विनाज्ञानाद्विनाध्यानात्ववि
नावेंद्रियनिग्रहात्॥५३॥प्राप्यतेभगवांस्तत्रतत्कथयस्वनः॥दैत्यराजत्वमस्माकंगुरुर्मार्गप्र
दर्शकः॥५४॥कथयस्वमहाभागयत्रतिष्ठतिकेशवः॥एवंसविप्रमुख्यैस्तुसंपृष्टोदैत्यसत्तमः॥५५
॥प्रणम्यब्राह्मणान्सर्वान्भक्त्यासंहृष्टमानसः॥नमस्कृत्यवेदेभ्योब्रह्मणेपरमात्मने॥५६॥
भगवद्भक्तियुक्तःसन्व्याहर्तुमुपचक्रमे॥इतिश्रीप्रह्लादोक्तसंहितायांद्वारकामाहात्म्येप्रथ
मोऽध्यायः॥ ॥१॥ ॥प्रह्लादउवाच॥सर्वेषामपिभूतानांदैत्यदानवरक्षसां॥भवंतोत्रेहउत्तमा

3/1964

देवादीनां तथैव च ॥१॥ अनुज्ञया तु पूज्यानां प्रसादात्केशवस्य हि ॥ अवस्थानं भगवतः कथयामि
निबोधत ॥२॥ पश्चिमस्य समुद्रस्य तीरमाश्रित्य तिष्ठति ॥ कुशस्थलीति या पूर्वं कुशेन स्थापिता पु
री ॥ वहते गोमती यत्र सागरस्य च संगता ॥ द्वारावतीति सा प्रोक्ता आनर्त्तेषु प्रकीर्त्तिता ॥४॥ त
स्यां वसति धर्मात्मा भुक्तिमुक्तिप्रदो हरिः ॥ कलाषोडशसंयुक्तो मूर्त्तिर्द्वादशनिर्युता ॥५॥ तदे
व परमं धाम तदेव परमं पदं ॥ द्वारका सा च वैधन्या यत्रास्ते मधुसूदन ॥६॥ यत्र स्थलस्थ उवा
दोःशंखचक्रगदाधरः ॥ नरा मुक्तिं प्रयास्यंति तत्र गत्वा कलौ युगे ॥७॥ तच्छ्रुत्वा ~~कलौ युगे तत्र~~ व
चनं तस्य प्रल्हादस्य महात्मनः ॥ विस्मयाविष्टमनसः सूचुर्द्विजसत्तमाः ॥८॥ ऋषय ऊचुः ॥ द्वा
यं द्रुकुले जाते नारिचापहृते नु वः ॥ प्रभासे यादवश्रेष्ठ स्वस्थानमगाद्धरिः ॥९॥ द्वारवत्यां ह्यावि ४
तायां समंतात्सागरेण हि ॥ कथं स भगवान् तत्र कलौ देत्य प्रकीर्त्तितः ॥१०॥ कथयस्व मम

प्येतत्कथं विष्णुर्महीतले ॥ स्थितश्चानंतदिशो च एतद्विस्तरतो वद ॥११॥ प्रल्हाद उ० ॥ उग्रसेनेन
रपतौ ॥ [illegible]शासति वसुधातलं ॥ स्थित्ये यदुपुरीमेनां शोभमानां समंततः ॥१२॥ रममाणे रमाना
थे रमाभिः रमणे हरौ ॥ एकदा तु समासीने सभायां यदुसत्तमे ॥१३॥ कथाभिः क्रियमाणाभिर्वि
चित्राभिरनेकधा ॥ उद्धवः कथयामास प्रवरं चात्रिनंदनं ॥१४॥ मात्रा या मनु संज्ञातं दुर्वासम
मकिल्बिषं ॥ सत्कृत्वा सह सोत्का यत्र भगवान् रुक्मिणी गृहं ॥१५॥ जगाम हृष्टमनसा विश्वश
क्तिपुरस्कृतः ॥ आगत्योवाच वैदर्भीं संप्राप्तं ऋषिसत्तमं ॥१६॥ तपोनिर्धूतपापात्मा सोत्रिपु
त्रो महायशाः ॥ आतिथ्येनार्चितो विप्रः प्रदास्यति महोदयं ॥१७॥ गृहीत्वाणेन गृहे यस्मात्तस्मा
त्रागमनं त्वया ॥ तत्र देवा न गृह्णंति पितरश्चोदकं तथा ॥१८॥ तदा गच्छ स गत्वा मो निमंत्रयि
तुमत्रिनं तथेत्युक्त्वा तु सा देवी रथमारुरुहे सती ॥१९॥ रथमारुह्य देवेशो रुक्मिण्या सहितो

5/1961

हरिः जगाम तत्र यत्रास्ते डुर्वासा मुनिसत्तमः॥२०॥ दृष्ट्वा ब्रह्मण्यं तं नृपमात्रीरेन दनंदीपतेः।क
पालिनस्य पुरतः सुस्नातकशाणीरको॥२१॥ प्रणम्य भगवानुत्तस्था प्रपछ्छानामयं तथा॥पश्चा
द्विदर्भतनयारुक्मिणीप्रणमे वतं॥२२॥ दुर्वासाश्चापितौ दृष्ट्वा दर्शनार्थमुपागतौ।पप्रछ
कुशलं तत्र स्वागतेनाभिनंद्य तौ॥२३॥ डुर्वासा उ॥ कुशलं लक्ष्म सर्वत्र कुत्र वा सत्त्व वाधुना॥
कतिधराधनाप्यमेतद्विस्तरतो वद॥२४॥ श्रीलक्ष्म उ॥ समुद्रेण प्रदत्ता मे भूमिर्दशयोज
ना। तस्यां निवासिता ब्रह्मन् पुरी हेममयी मया॥२५॥ ग्रामा दासत्रसौ वर्षाणि वजहाणि संख्य
या॥ तस्यां वसामि संहृष्टः त्वत्प्रसादाच्च सुनिर्नयः॥२६॥ तच्छ्रुत्वा वचनं तस्य विस्मयाविष्टमान
सः॥ प्रत्युवाच स डुर्वासा प्रहस्य मधुसूदनं॥२७॥ वसंति ताः कवकापेच तेषां संख्या वदस्व मे। या ५
वत्य पत्न्यश्च महिष्यः पुत्राः परिजनस्तथा॥२८॥ श्रीलक्ष्म उ॥ ब्रह्मन् षोडशसाहस्रं नार्यश्चाष्टाधि

कामम। तासां मध्येऽष्टतमा विदर्भाधिपतेः सुता॥२९॥ एकैकस्यां दश दश पुत्राश्चैका च कं
गना॥ षट्पंचाशत् सहस्रांडकोद्यः परिजनो मम॥३०॥ शेषां प्रश्नतयो ब्रह्मन् तेषां संख्या न विद्य
ते॥ तच्छ्रुत्वार्थितया मास किमेतदिति निश्चयः॥३१॥ अहो अनंतवीर्यस्य मायया मास्मि स्थितिः स
॥ अनंतसर्गकृत्स्वे प्रवृत्तिर्दर्शितामियं॥३२॥ डुर्वासा उवाच॥ स्वागतं वो महाभागा भूतकिंकर
वाणि ते। दर्शनेन त्वदीयेन प्रहृष्टं मे मनोऽधिकं॥३३॥ श्रीलक्ष्म उ॥ यदि प्रसन्नो भगवान् तदा गछ
उ मे गृहं। शिरसा धार्य पादांबु तेनो यामि पवित्रतां॥३४॥ डुर्वासा उ॥ अद्य मासा रसवस्त्रं किं मा
नयसि माधव। नयमां यदि मद्वाक्यं करोषि सहभार्यया॥३५॥ एवमस्त्विति श्रीकृष्णः प्रस्थितः स त
रथेन हि। तं दृष्ट्वा प्रस्थितं विष्णुं प्रहस्योवाच रोषतः॥३६॥ श्रीलक्ष्म उ॥ यथा यथा ब्रवीषि त्वं विप्र
कर्तास्मि तत्तथा त्वया तु पालितो ब्रह्मन् अभिवितोऽहं सबांधवः॥३७॥ प्रद्युम्न उ॥ तत्र पाशुपि वर्यो

7/1964

मोपुक्तां देवीं स्वके रथे॥ तथैव पुंडरीकाक्षं या ह्रिया ह्रीसमन्विता॥३८॥ तं दृष्ट्वा देवताः सर्वे
वहमानं हरिं रथे॥ साधु साध्विति ता प्रोचुः ऊचुः सर्वे परस्परं॥३९॥ अहो ब्रह्मण्यदेवस्य परां भ
क्तिं प्रपश्यत॥ स्कंधे कृत्वा धुर्यधुरां वहन् वह्नेः सहभार्यया॥४०॥ विकीर्यमाणः कुसुमैः सुरसंघैर्मुदान्वि
ता॥ जगाम सरथं गृह्य सभार्यो द्वारकां प्रति॥४१॥ वहमाने रथे तस्मिन् रुक्मिणी तृषिताभवत्
उवाच कृष्णं वैदर्भी श्रमव्याकुललोचना॥४२॥ श्रांतास्मि रथपरिक्लिष्टा वदनं कोपि तृद्दितं॥ पा
ययस्वोदकं कांत नय मां मंदिरं स्वकं॥४३॥ तच्छ्रुत्वा वचनं तस्याः पदाक्रम्य धरातलं॥ तस्मिन्ना
व नयामास गंगां त्रिपथगामिनीं॥४४॥ तां दृष्ट्वा निर्मलं शीतं सुगंधि पावनं जलं॥ पपौ पिपासि
ता देवी रुक्मिणी जाह्नवी जलं॥४५॥ पीतं तया जलं दृष्ट्वा दुर्वासाः कोपशोषितः सत्तमः॥ जज्वाल ज्वल ६
नप्रख्यः शशाप परमेश्वरीं॥४६॥ मामपृष्ट्वा जलं यस्मात् पीतवत्यसि रुक्मिणि॥ तस्मात्स्थानत

रु

तो नित्यं त्वं वियुक्ता भविष्यसि न संशयः॥४७॥ अवियुक्ता रथाद्यस्मात् सीतवसि रुक्मिणी॥ पीतं तस्मात्त्वच्छ
स्त्रेन वियुक्ता त्वं भविष्यसि॥४८॥ एतावदुक्त्वा वचनं क्रोधसंरक्तलोचनः॥ परित्यज्य रथं विप्रो भूमावेवा
वतिष्ठत॥४९॥ प्रह्लाद उ॥ एवं शापात्तदा देवी रुरोदातीव विह्वला॥ उवाच कृष्णं करुणं कथं स्थास्ये
त्वया विना॥५०॥ श्रीकृष्ण उ॥ आयास्यामि प्रसहं देवि द्विकालं सुवनं तव॥ यो मां पश्यति चात्रस्थं सत्वा
मेव प्रपश्यति॥५१॥ मां हि दृष्ट्वा नरो यस्तु त्वां न पश्यति भक्तितः॥ अदृश्या त्वा फलं तस्य न भविष्यति न सं
शयः॥५२॥ विलप्य प्रियया वायं ब्राह्मणो यदुनंदनः॥ ततः प्रसादयामास दुर्वाससं महकल्मसं॥५३॥ बा
ह्योपवनमध्यस्थं पूजया मास तं द्विजं॥ अवनिज्य स्वयं पादौ विप्रपादावनेजनं॥५४॥ शिरसा धारया
मास जगतः पावनो हरिः॥ दत्वार्घ्यं गां च विप्राय मधुपर्कं च भक्तितः॥५५॥ आविधिवद्भोजयामास षड्रसे
न द्विजोत्तमं॥ इति श्री प्रह्लाद संहितायां द्वारकामाहात्म्ये द्वितीयोऽध्यायः॥२॥ ऋषय ऊचुः॥ ॥

9
1964

धा

अहो ब्रह्मण्यदेवस्य ब्रह्मण्यस्य महात्मनः। महिमायद्यं नैवमृषा चक्रे मुनेर्वचः॥ नैनश्चित्रमशेषाणां मे
धुपालेजनार्दने। मृगोयं श्वरणं यान्ति दिक्षारक्षद्दिलांछनं॥२॥ सा तु देवी कथं तेन प्रेयसा विप्रयोजि
ता। एकाकिनी स्थिता तत्र कथ्यतां मसुरेश्वर॥३॥ उक्तं गिताइ वयं श्रोतुं रुक्मिणी चरितं तदा। इद
मादौ बुभुत्सामे चित्तखेदापनुत्तये॥४॥ सूत उवाच॥ श्रूयतामृषयः सर्वे गदतो मम विस्तरात्॥ यथा शा
पोद्भवं दुःखं मुमोच हरिवल्लभा॥५॥ अथ दुर्वाससः शापमवाप्याक्रन्दं तदा। या देवेन्द्रस्य गृहिणी तो
बक्राशः पर्यवेदयत्॥६॥ रुक्मिण्युवाच॥ कल्याणी बत वर्णेयं लौकिकी संस्थिता मते॥ कुंकुमस्यां
धौतमिषी वगिर्मणि नाधिकं फलं॥७॥ यन्नाम मात्रं स्मरणाप्यायाः प्राप्यनाथं जगत्सर्वं॥ इयमेकाकिनी जा
ताप्यो सस्मादेव हेलनात्॥८॥ कर्मगत्यालयः श्रीमान्नन्दबद्धगुणो हरिः। अल्पपुण्यास्तु चांगा मन्दमतिः क ७
थमाहरी॥९॥ अपि नो घटया मास मधाता वचन कोविदः॥ विधान्नं मेत्युना यामे वियोग विषमयं यां॥१०॥

दु श्या

स्वयं २

अन्यथा वर्णगुरवः स्नाता स्त्रैविध्य कर्मणि। कथं नु शासु मर्हन्ति स्त्रियं खिन्नामनागमं॥११॥ एवमेतद्योमयं 11/1964
विधिविद्वेषे मे [illegible] हृदयं हित ता॥ ला नधान विदीर्यते यतो विरहे दुर्विषहे मधुद्विषः॥१२॥ कृतिनः खलु खेल
नीतरैर्वत्तू वामाचरितो यमं तकः॥ अग्निवां छित मिसङ्गो मने मरणे यो विहस्य सप्तौ लसं॥१३॥ अपि शप्य हो
मुडश्चिरं तपः प्रतिलब्धः प्रथमं मम्नात्मनजः॥ बत तेन [illegible] विना कृता प्यहं न मृताप्यं च सुवासरे षु हा॥१४॥ उ
पलस्य सुदारुणा मिमामथ पीडा म विता म्पहं न दा॥ यदि हं निधनायुता युगे स्तु लिखं वै सम मे सलक्ष
णं॥१५॥ परिपातिद्विडुः स्वहा सुखं जनमीशो विवशात्वमित्रतः॥ निज वृष्णिजि मृश्रया पदे ह्यधमा णोध
निको पिपालये त्या॥१६॥ इति सा विलपन्नारतं कुररी वान्निरन्तरस्विनी॥ व्यसनेन विदूषिता शया हि
जशापापहतामुमुर्छहा॥१७॥ अदृष्टा धिं श्रियं साक्षात् रुक्मिणीं ब्रह्म वल्लभां॥ मूर्छितामतद्दर्शितामा
जगाम पयोदधिः॥१८॥ सुधासीकरगर्भेण कर पंकज वायुना॥ तां समाश्वासयामास सिंधुः पूर्वजवान्म

जं॥१९॥एतस्मिन्नंतरे तत्र व्योममार्गेण नारदः॥ उपवीणयितुं प्राप्तस्त्रिविक्रमसुतं हरिं।२०। स दृष्ट्वा सिं
धुनाथस्य ममात्मानं विश्वस्य ममात्मनः। अवतीर्यश्रुतिकथोबोधयामास भक्तितः॥२१॥ मा कुरोद्धे हि देवेशि
देवेशो दयितेप तौ॥ हरिञ्च ते विप्रशापात् कुरु कल्याणि धीरतां॥२२॥ देवी भगवती साक्षात् त्वं सत्यसि पु
रुषोत्तमः। अवतीर्णो धराभारमपनेतुं यदृच्छया॥२३॥ देवोसौ परमं ब्रह्म निर्विकारं निरंजनं। मायाश
क्तिस्त्वमेतस्य सर्गस्थित्यंतकारणं॥२४॥ मं रुसनिखिलं शेनेयदासौ कलया स्वराट्॥ तदानविश्नयुसे
तत्र्या विश्वपतिश्चयः।२५। अविमुक्तस्त्वया नित्यं देवदेवो जगत्पतिः। लीलावतारेष्वेतस्य त्वं सर्वेषु हा
यनी।२६॥ संयोगं च वियोगं च तथाप्येष त्वयानघे॥ विडंबयति भूतानां अनुकारार्थमीश्वरी॥२७। आ
राधनीयः सततं भूदेवो भूतिमीप्सुभिः॥ प्रकोपनीया नैवैते विप्रास्तज्ज्ञाहितपश्चिनः।२८। इत्येवं (शि) त्व ८
यज्ञोकं वियोगं ते तु मन्यसे॥ मुनिः शापाद्विसास्मागूढः कपटमानुषः॥२९॥ अयि स्मरसि कल्याणि

रघुवंशधुरीयथा॥ लोकानुग्रहमन्विछन्त्वां विवासितवानयं।३०। अवैतु बत लोकोयं जनानामनुरंजनं 13/1964
प्राणेभ्योपि गरीयांसमपि देवस्तथा व्यधात्।३१। येनेदं पूरितं विश्वं बहिरंतर्मसौ सुव्रते॥ विश्वात्मनो नावि
योगस्ते कथं तेनोपपद्यते॥३२॥ असंगस्य विभोः संगोय दृश्या दिवरैः सह। तया त्वया वियुक्तो मा वितिष्र
सेवतिको न्विदः।३३॥ तद्विमुंचाधिमत्यर्थमात्मानमनुसंस्मर प्रसीद मातः संधेहि धीरतां स्वमनीषया
॥३४॥ इतिब्रुवति देवर्षौ विषमानेन महीपतिः॥ प्रोचिवान वमराभिज्ञो गिरा मृदुलवर्णया।३५। समुद्रठ
यदाह देवि देवर्षिर्न तदेव पि वै मृषा॥ गीयते ह्यविदिदेवेषु नित्यं विष्णोः सहायनी॥३६॥ एकः पुमानेष निर
स्तं तंत्रो मदो विधत्तोपदधातिभूतयः॥ विश्वं स वत्स्वापयति स्वशोषिषा त्वया सहायेन बिभर्त्ति मूर्त्ति॥३७॥
तदेव परिखिदस्व नमानार्दपियुस्मते॥ वत्सस्त्वसत्कलस्त्वासि नित्यं श्रीवक्षस्त्वस्मणि।३८॥ इत्यं नागरथी
देवी महादेवाङुपागता॥ विनोदयिष्यति नित्यं मात्वा हि देवी श्रीरी रिणी॥३९॥ एतस्यास्यां मृदुत्वाङ
श्री

सदा
पयसा पोऽद्भिः। प्रदेशोऽयमरीषस्त्वनविता नयनोत्सवः॥४०॥ मत्तबर्हिसमाजुष्टं मंजुगुंजन्मधुव्रतं। ना
नाद्रुमलताकीर्णं नानापुष्पोपशोभितं॥४१॥ नवपल्लवभृंगाभिः कुसुमस्तबकैः शुभैः। फलैरमृतकल्पै
श्च मंजरीराजिभिस्तथा॥४२॥ नंदनस्य श्रिया जुष्टं मनोनयवनंदनं॥ वनं रम्यतरं चात्र अचिरेण न विष्ण
ति॥४३॥ तयामं बोधनी या मो वयं मातः सदेवहि॥ अशेषरूपा विद्यास्त्वं अस्मान्निबोधय मे कथं॥४४॥ त
यीदाचामनुजानीहि प्रसीद परमेश्वरी॥ नमस्ते विश्वजननी भूयोपि च नमोनमः॥४५॥ प्रज्ञाद उ॥
एवमुक्ता जगद्धात्री जग्मतुस्तौ यथागतं। आजगाम च तत्राशु देवी भागीरथी स्वयं।४६। वनं समस्त
मत्र दिव्यभूरुहशोभितं॥ सेव्यं समस्तलोकानां फलपुष्पैः सुसंह्रिमत्॥४७। प्रवाहेण च भूतानाम
शेषाघौघहारिणी॥ भूषयामास तं देशं सा च विष्णुपदी सरित्॥४८॥ देवी च मुनिवाक्येन गंगायाश्च वि
नोदनात्॥ सौंदर्यं तस्य देशस्य किंचित्स्वास्थ्यमवापह॥४९॥ अथ विष्णुपदी देवी श्रुत्वा सागरसंगतां॥ ९

स्तस्ततः समाजग्मुः श्रद्धया नाम तपस्विनः॥५०॥ द्वारकावासिनश्चैव जंगमाः कामनशोभया॥ हृष्ट 15/1964
चित्ताः समाजग्मुः आनिशं रुक्मिणीवनं॥५१॥ श्रुत्वा तदखिलं सर्वं देवी माः शांकरी कला। चुकोप स्म
यमानश्च भूय एतदभाषत॥५२॥ देव्युवाच॥ कः प्रभुस्त्रिषु लोकेषु महाव वचनमन्यथा॥ विष्णुमपि देवा ह
नामाद्यो लोकपितामहः॥५३॥ किं न जानाति लोकोयं मयि रोषकषायिते। आक्रंपति त्रिभुवनं
त्रष्टश्रीकमभूत्तदा॥५४॥ ममशापमविज्ञाय नंदनप्रति मे वने॥ कथं तु रुक्मिणी तत्र रमते जन
नसेविते॥५५॥ तद्देनेन रवः सर्वे ह्यसंभोगफला नृणां। विनष्टं सर्वसौभाग्याः कुसुमस्तबकोज्झि
ताः॥५६॥ इयं तु नैव शापाद्धि हरेश्चूडामणिः सरित्॥ अरिरिणी तथापीयं नैवेदृक्तानुमर्हसि॥५७
प्रज्ञाद उ॥ तथा सर्वप्रभूतत्रये ह्यद्राहच वै मुनिः॥ वा चिवीयं हि विप्राणां निर्मितं विष्णुना स्वयं।
५८॥ सा तु देवी तथा वक्तमवेक्ष्य भूशदुःखिता॥ सिषेध रसयं देव समोपतनं पुनः पुनः॥५९॥ ततस्तु सापि

निश्चित्य मरणं दुःखनिषण्णा। उत्तरीयांबरेणैव कंठपाशं चकार सा॥६०॥ दधौ च चरणं सोऽनतुः संताप
नाशनं॥ सदैकहृदयेनैव बहिः किंचिदबुध्यत॥६१॥ अथावबुध्य मेऽस्य वीरवृत्तं गुहाशयः। देवश्च
त्वरमस्मागान्मुपर्षिनित्वराञ्चितः॥६२॥ ददर्श दूरतो देवीं कंठपाशकरां स्थितां। अथ कोशात्कृशाखा
यानिमीलितविलोचनां॥६३॥ तां वीक्ष्य पांडुवदनां जटैकवेणीं विभ्रष्टभूषणगणां सद्यो देहवह्नि
प्लुष्यत्सुस्वीं बुजरुचां मरणप्रसक्तां मेने स विग्रहवतीं करुणां कृपालुः॥६४॥ सं श्लिष्य सोऽपि पतंगा
धिपतेरन्यूनसंभूतसंभ्रमैरस्थलपक्ष्मजन्मा॥ सोमाम्यवत्रिकविधवर्तितलोचनाश्राश्रामंतमि
ष्टमकृतं निजजीवनाथो॥६५॥ तद्विवक्षविवशात्रपया परीता कोपोपराग कलुषास्मृतविभ्रंश
ना॥ संवर्द्धिताद्भिगुणैर्शोकतरा द्विदेवीनानारसं वतरदृष्टिं विपर्ययं प्रपेदे॥६६॥ तस्याः समाश्वसवि १०
सर्गश्चिकीर्षिताया: पार्श्वांव्ययोह्य करचारुसरोरुहाग्रात्॥ आदाय पाणिममृतोपमया च वाचा

स्त्वं तु

संजीवयन्निदमुदारमुदाजहार॥६७॥ श्रीभगवानुवाच॥ किमेतत्साहसं भीरु चिकीर्षितं विचारितं॥ ननु दे
वि ममाचक्ष्व किं नु ते खेदकारणं॥६८॥ त्वं विद्याहं परो बोध त्वं माया चेश्वरस्त्वहं॥ त्वं बुद्धिरहं जीवो वियोगः क
थमावयोः॥६९॥ माया विमोहितात्मानो भ्रमंत्य जनवादयः॥ सा कथं मुह्यसे त्वं तु स्वधाम्नामनचिं
तितान्॥७०॥ त्वया हि बद्धा ऋषयः संसरंतीह कर्मभिः॥ तत्त्वां कथमृषिः शप्तुं शक्नुयादथ वासवः॥७१
रथार्थं विह्वलो का नाम एवमेहे विचेष्टितं॥ मया त्वया समाविष्टः कुरुते विवशः पुमान्॥७२॥ पक्षप
कोपपरीतात्मा दुर्वासा यो भवत्तदा॥ सोऽस्मै तिरस्क्रिनस्रो यमधुनाम स्त्वनोदितः॥७३॥ प्रज्ञा द३॥ ॥
विशोमनोरथसमं पश्चात्तापानुगाशयः॥ किं मयाज्ञत्समिस्मान्नोंदुर्वासाः समुपागमत्॥७४॥ अद्य ह
राद्धिन्तु तन्मूर्तिं दंडवद्वंश्च संस्कृतः॥ पितरौ जगतो देवौ क्षामया मामदीनवाक्॥७५॥ तुष्टावसूक्त
वाक्यैस्तु रहस्येन भक्तिसंयुतः॥ आह चेदं जगन्नाथौ यदि मय्यस्त्वनुग्रहः॥७६॥ तदा पुरैव संयोगो देव

17/1964

देव्या विधीयतां ॥ अथ प्रहस्य गोविंदो नमास्तु मुनिपुंगवे ॥७७॥ नहि ते वचनं जातु मृषा भवितुमर्हति
मयैव विहितः सेतुर्यद्यसो घोरगिरा द्विजाः ॥७८॥ तं कथं स्वकृतं सेतुं भिंद्यां लोकस्य पालकः । दिने दिने हि
कालस्य सध्यामस्या मुनिसत्तम ॥७९॥ विनोदयिष्यते तां तु मुनिरुन्मत्तकोप्ययं ॥ प्रहासवचनैर्नित्यैर्म
कथाकथनैरपि ॥८०॥ यतः पूत्या त्रिलोकस्य मम मत्स्य भविष्यति ॥ यद्येवं मयि वैकुंठमधिरूढे महो
मम ॥८१॥ प्रवेक्ष्यति कलौ प्राप्ते त्रिविक्रमतनौ हरौ ॥ तदंतस्याः कलौ विप्र मम कृष्णा करुणया महा
८२॥ तस्याः सैव पुनर्मूर्तौ मम वक्षःस्थितिमेष्यति ॥ इयं भागीरथी चापि सागरेण समागता ॥८३॥ नूनं दा
सशेषदुःखानि तस्मादपहरिष्यति ॥ अनुग्रहं विधायैवमृषिणा सह केशवः ॥८४॥ विवेश स्वपुरीं तत्र वि न
धायोन्मत्तकं विभुः ॥ सापि देवी च संबुध्या तदा तमविवेष्टितं ॥८५॥ अनुग्रहं भगवतो बभूव विगत ह ११
रा ॥ अत्रस्थ मुक्ता दुःखेन तत्र देवी हरिप्रिया ॥८६॥ ततो भागीरथी मातुर्गदिता दुःखमोचनी ॥ अमा

श्री

वास्यां शुक्लैरिमास्यां यस्तस्याः संगमे शुभे ॥८७॥ स्नायाद्शेषदुःखात्स नरः परिमुच्यते ॥ अष्टम्यां च चतुर्द
श्यां नवम्यां च विलोकिता ॥८८॥ नराणां रुक्मिणी देवी सर्वान्कामान्प्रयच्छति ॥ इत्येतत्कथितं देव्यास्तस्या
दुःखमोक्षणं ॥८९॥ अनुग्रहस्य देवस्य किं भूयः श्रोतुमिच्छथ ॥९०॥ इति श्रीप्रह्लादोक्तसंहितायां द्वारकमा
हात्म्ये रुक्मिणीदुःखमोक्षणं नाम तृतीयोऽध्यायः ॥ ॥३॥ ॥श्रीप्रह्लाद उ॰॥ ॥एवं संपूजितस्तेन हरिणा
ब्राह्मणोत्तमः ॥ उवाच परिसंतुष्टो वरं ब्रूहीति केशवं ॥१॥ श्रीकृष्ण उ॰॥ ॥यदि तुष्टोसि भगवान्यदि देयो
वरो मम ॥ स्थातव्यमत्र भवता न सकृद्व्यं कदाचन ॥२॥ दुर्वासा उ॰॥ ॥यदि तुष्टास्यहं ब्रह्मन् तथा त्वमपि केशव
तिष्ठस्व षोडशकलो नित्यं मद्वचनेन हि ॥३॥ श्रीकृष्ण उ॰॥ ॥यत्र पश्यंति भक्त्या त्वं मां चापि द्विजसत्तम । किं
ददासि च तेषां त्वं भाविनां भगवन्वद ॥४॥ दुर्वासा उ॰॥ ॥यः स्नात्वा संगमेऽस्मिन्गोमत्याः सागरस्य च । त्वा
मास्यर्च्चेन्नरः सर्वपापैः प्रमुच्यते ॥५॥ त्वमप्येवं विधेहि श्रियस्त्वदास्यति तद्वह ॥ समदत्तदेवस्य भाव

यत्षोडशोत्तरं ॥६॥ श्रीब्रह्मोवाच ॥ ॥ यो नरः पूजयित्वा त्वां पूजयिष्यति मामिह ॥ तस्य मुक्तिं प्रदास्यामि
या सुरैरपि दुर्लभा ॥७॥ प्रह्लाद उवाच ॥ ॥ परस्परं वरौ दत्वा तस्मिन्स्थाने व्यतिष्ठतां ॥ वरदानं ततस्तोकं त
त्स्थानं सर्वकामदं ॥८॥ तदा प्रभृति विप्रेंद्रा द्वारकां हरिरीश्वरः ॥ दुर्वाससो गिरा बद्धो न जहाति कदा
चन ॥९॥ यत्र त्रिविक्रमीमूर्त्तिर्वहते यत्र गोमती ॥ नरा मुक्तिं प्रयास्यंति चक्रतीर्थे न संशयः ॥१०॥
कलेवरं परित्यक्त्वा प्रयान्ति हरिणा सदा ॥ कलाभिः सहितं तेजस्तस्यां मूर्त्तौ निवेशितं ॥११॥ तस्मात्कलि
युगे विप्रा नान्यत्र प्राप्यते हरिः ॥ यदि कार्यं हि तल्लोके तत्र गच्छत मा चिरं ॥१२॥ ऋषय ऊचुः ॥ साधु भा
गवतां श्रेष्ठ साधु भागवदर्शक ॥ यस्त्वया हि परिज्ञातं तन्न जानाति कश्चन ॥१३॥ किं फलं गमने तस्याः
किं फलं तत्र दर्शने ॥ तानि तीर्थानि तत्रैव के देवास्तत्र दर्शनः ॥१४॥ कस्मिन्मासे तिथौ कस्यां कस्मिन्प १२
र्वणि मानवैः ॥ गंतव्यं कानि देयानि दानानि दनुजर्षभ ॥१५॥ इति पृष्टस्तदा तैस्तु महाभागवतोसुरः

कथयामास विप्रेभ्यो भगवद्भक्तिसंयुतः ॥१६॥ भो भूमिदेवाः शृणुत परं गुह्यं सनातनं ॥ यन्न कस्य
चिदाख्यातं तद्वक्ष्यामि सुविस्तरात् ॥१७॥ यदा मतिं प्रकुरुते द्वारकागमनं प्रति ॥ तदा नरकनिर्मुक्ता
गायंति पितरो दिवि ॥१८॥ यावत्पदानि तस्य मार्गे गच्छति मानवैः ॥ पदे पदेश्वमेधस्य यज्ञस्य लभ
ते फलं ॥१९॥ यात्रार्थं निःसृते देवस्य यः प्रेरयति चापरान् ॥ मानवान्नात्र संदेहो लभते वैष्णवं पदं ॥२०॥
द्वारकां गच्छमानस्य यो दद्यात्प्रतिश्रियं ॥ तथैव मधुरां वाणीं क्रीडते नंदते हि सः ॥२१॥ अध्वनि श्रां
तदेहस्य वाहनं यः प्रयच्छति ॥ हंसयुक्तेन स नरो वाहनेन दिवं व्रजेत् ॥२२॥ यात्रायां गच्छमानस्य मध्या
ह्ने क्षुधितस्य च ॥ अन्नं ददाति यो भक्त्या शृणु यां लभते फलं ॥२३॥ गयाश्राद्धेन यत्पुण्यं लभते मानवा
भुवि ॥ अन्नदानेन तेनेह पितृणां तृप्तिकारक ॥२४॥ उपानहौ च यो दद्याद्द्वारकां प्रतिगच्छतां ॥ तस्य
प्रसादात्स नरो गजस्कंधेन गच्छति ॥२५॥ विघ्नमाचरते यस्तु द्वारकां परिगच्छतां ॥ नरके स पतेन्मूढः

21/1964

कल्पमात्रं तु रौरवे ॥२६॥ मार्गे स्थितस्य यो ध्यानं प्रयच्छति दकमंडलुं ॥ प्रपादानं महत्त्वस्य फलमाप्नोति
मानवः ॥२७॥ यात्रायां गच्छमानस्य पादाभ्यंगं ददाति यः ॥ पादप्रक्षालनं चापि सर्वान्कामानवाप्नु-
यात् ॥२८॥ कथं शृणोति यो विप्रो गीतवाग्गच्छतः पथि ॥ दानं ददाति मनुजस्तस्माद्धन्यतरो नहि
॥२९॥ कैलासशिखराकारं श्वेताभ्रमिव निर्मलं ॥ प्रासादं देवदेवस्य यः पश्यति द्विजोत्तमः ॥३०॥
दूरादेव मयं दृष्ट्वा कलशध्वजसंयुतं ॥ वाहनं संपरित्यज्य तुष्टो धरणीतले ॥३१॥ पंचसूनाकृतं पापं त-
था मार्गकृतं च यत् ॥ कृमिकीटपतंगाश्च हताः पथि गच्छता ॥३२॥ परान्नं परपानीयं स्नमर्दनिव संगमं ॥
तत्सर्वं नाशमायाति भगवत्केतुदर्शनात् ॥३३॥ पठन्नामसहस्रं तु स्तवराजमथापि वा ॥ गजेंद्रमोक्ष-
णं वापि पथि गच्छन् शनैः शनैः ॥३४॥ गायमानो भगवतः प्रादुर्भावाननेकधा ॥ नृत्यन् हर्षसंयुक्तो ग- १२
च्छेत्हृष्टमनाः शुचिः ॥३५॥ अधौतपादपद्मं तं नमस्कुर्यात्क्षिणीश्वरं ॥ सर्वविघ्नविनाशं च लभते नात्र

संशयः ॥३६॥ नीलोत्पलदलश्यामं कृष्णं देवकिनंदनं ॥ दंडवत्प्रणमेत्स्त्री सा धणीपसाग्रजं पुरा ॥३७॥
बाल्ये च यत्कृतं पापं कौमारे यौवने तथा ॥ दर्शनात्कृष्णदेवस्य नष्टं नात्र संशयः ॥३८॥ हेमभारसहस्रैस्तु दत्तै-
र्यत्फलमाप्यते ॥ तत्फलं कोटिगुणितं कृष्णवक्त्रविलोकनात् ॥३९॥ कर्मणा मनसा वाचा वाचायत्समुपा-
र्जितं ॥ पापं जन्मसहस्रेण तन्नष्टं नात्र संशयः ॥४०॥ तावद्रागविरागबंधुममता देहाभिमानं जडो
नृणां ॥ भूतभयं करोपि भयदो कल्पायते जीवितं ॥४१॥ यावत्सूर्यनिभाननं स्मितकरं कल्याणसंमोह-
नं नो पीतांबरगा ह्यगोमति जलं हृद्ग्रामिदं भूतले ॥४२॥ नमस्कृत्वा तु देवेशं पुंडरीकाक्षमच्युतं ॥ उवा-
स संप्रहृष्टात्मा नंदारका परिरक्षणं ॥४३॥ प्रणम्य परया भक्त्या वैनतेयसमन्वितं ॥ द्वारकागमनं च पुनः स्वर्ग-
द्वारोपमे शुभे ॥४४॥ विश्रम्य च मुहूर्तार्द्धं मुहूर्तं द्विविधं विवेकिनः ॥ तत्राश्रित्य तत्समाहूय ब्राह्मणान्मंत्र-
कोविदान् ॥४५॥ दर्विदर्भं समानीय तत्तीर्थं समानयेत् ॥ इति श्रीप्रह्लादसंहितायां द्वारकामाहात्म्येया

23 / 1964

च्चाविधानंनामचतुर्थोऽध्यायः॥ ॥४॥ ॥प्रह्लाद उ॥ ततो गच्छेद्द्विजश्रेष्ठा गोमतीं कृष्णसंश्रियां॥ यस्यां
दर्शनमात्रेण मुच्यते सर्वपातकैः॥१॥ हरितोषक्षयकरं सर्वमंगल्यविनाशनं॥ सर्वकामप्रदं पुंसां
प्रणमेद्गोमतीजलं॥२॥ महापापक्षयकरं सगतीनां गतिप्रदं॥ पूर्वपुण्यवशात्प्राप्तं सुश्रीनं गोम
तीजलं॥३॥ ऋषय ऊचुः॥ दैत्येंद्र संशयो ह्यस्माकं छेत्तुमर्हसि शेषतः॥ इयं का गोमती तत्र केनानी
ता महामते॥४॥ केन कार्यवशेनेव प्राप्ता वरुणालयं॥ सर्वज्ञा गवतां श्रेष्ठ एतद्विस्तरतो वद॥५
प्रह्लाद उ॥ ॥एकार्णवपुरा भूते नष्टे स्थावरजंगमे॥ तदा ब्रह्मा समभवत् विष्णोर्नाभिसरोरु
हात्॥६॥ आदिष्टः प्रभुणा ब्रह्मा सृजस्व विविधाः प्रजाः॥ इति वेधा समादिष्टो हरिणा सृष्टिकारणे
॥७॥ बादमित्येवतं चोक्त्वा ततः सृष्टौ मनो दधे॥ ससर्ज मानसाः सप्त सनकाद्यान्कुमारकान्॥८॥ १४
उवाच वचनं ब्रह्मा प्रजाः सृजत पुत्रकाः॥ ब्रह्मणो वचनं श्रुत्वा तेतां जलिपुटा ऊचन्॥९॥ भगव

न्भगवद्रूपं द्रष्टुकामा जगत्पतेः॥ निबंधमनुवर्त्तामः सृष्टिरूपं दुरासदं॥१०॥ इत्युक्त्वा ते ययुः सर्वे सनका
द्याः कुमारकाः॥ पश्चिमां दिशिमास्थाय तीरे नदनदीपते॥११॥ तेजोमयस्वरूपस्य द्रष्टुकामा महात्मनः॥
तस्मिन्मनः समाधाय तेपिरे परमं तपः॥१२॥ बहुवर्षसहस्रेषु प्रसन्नो धरणीधरः॥ निद्राकल्मसमुत्सृष्टो सू
र्यरूपं दुरासदं॥१३॥ अदृष्टैनेकदेसस्वमनं बहुयंत्रविदारणं॥ सूर्यकोटिसमाभासं सहस्रारं सुदर्शनं॥१४॥
तं दृष्ट्वा विस्मिताः सर्वे ब्रह्मपुत्राः परस्परं॥ वीक्ष्यमाणा भगवतः परमायुधमुत्तमं॥१५॥ ताश्च विस्मितास्त
दोवाच वाग्वाचा ह्यशरीरिणी॥ नो ब्रह्मपुत्रा भगवन्श्रीघ्रमाविर्भविष्यति॥१६॥ अदर्शनार्थं भगवतः
ःशीघ्रमर्थं प्रतीक्षत॥ आयुधं लोकनाथस्य शीघ्रमत्र प्रमाद्यतां॥१७॥ तच्छ्रुत्वा वचनं तेषां तुष्टुवुस्ते सु
दर्शनं॥ ऋषय ऊचुः॥ ज्योतिर्मय नमस्तेस्तु नमस्ते हरिवल्लभ॥ सुदर्शन नमस्तुभ्यं सहस्राक्ष याक्षय॥ न
मस्ते सूर्यरूपाय वह्निरूपाय ते नमः॥१८॥ अमोघाय नमस्तुभ्यं रथांगाय नमो नमः॥ एवं संपूज्यामा

25/1964

सुःसुमनोभिस्तथाक्षतैः॥२०॥तत्र चैव निधिविधेस्तु ब्राह्मणो मुदिरिवस्तृतं॥ते प्रमोदयसुनाग्नेसुप्रहृष्टमंदर्श
नोत्सुकाः॥२१॥स्मरंतो मनसा देवं ब्रह्मणो पितरं स्वकं॥तेषां तु चिंतितं ज्ञात्वा ध्रुवज्ञो धर्मविदां ब्रवीत्॥
२२॥याहि शीघ्रं सरिच्छ्रेष्ठे पृथिव्यां हरिकारणात्॥गंगनात्वं महाभागे ततो ब्रह्म मता मिमे॥२३॥उर्व्यां
तेगोमतीनाम सुप्रसिद्धा भविष्यति॥वसिष्ठानुगता सा त्वा याहि शीघ्रं रसातलं॥२४॥पितेव पुत्री तिय
थावसिष्ठतनयां तव॥बाढमित्येव तं देवी प्रस्थिता वरुणालयं॥२५॥वसिष्ठस्त्वग्रतो याति गंगा तं पृष्ठतो
व्रगात्॥तां दृष्ट्वा मनुजाः सर्वे वसिष्ठेन समन्विताः॥२६॥नमश्चक्रुर्महाभागां गच्छंती पश्चिमां दिशं॥आ
विर्बभूव तत्रैव यत्र ते मुनयः स्थिताः॥२७॥द्रष्टुकामा हरे रूपं श्रियायुक्तं चतुर्भुजं॥दृष्ट्वा वसिष्ठमनुजां आ
यांतीं सुरपाविनीं॥२८॥संहृष्टमनसः सर्वे साधु साध्विति चाब्रुवन्॥वसिष्ठं ते ततो दृष्ट्वा उत्तस्थुः सर्वतो द्विजा १५
ः॥२९॥तत्रत्या ब्राह्मणाः सर्वे प्रहृष्टा इदमब्रुवन्॥यस्माद्वयामसमानीता यस्मिन् स्थाने सरिद्वराः॥३०॥तस्मा

द्भवसुते स्येवं ख्यातिं लोके गमिष्यति॥गां स्वर्गाद्धि गता यस्मात् इमं स्थानं मनोगता॥३१॥तस्माद्धि गोमती 27 / 1064
नाम ख्यातिं लोके गमिष्यति॥अस्याद्दर्शनमात्रेण मुक्तिं यास्यंति मानवाः॥३२॥किं पुनः स्नानदानादि स्वच्छा
यां तु हरेः पदं॥तमेव मर्घं दत्वा ते योगी ध्याइ हरिर्हरिं॥३३॥परं पुरुषसूक्तेन रमेशं शेषशायिनं॥इति संस्तु
वतस्तेषां हरिराविर्बभूव ह॥३४॥पीतकौशेयवसनं वनमाला विभूषितं॥दिव्यगंधानुलिप्तांगं दिव्याभरण
भूषितं॥शोभासनगतं देवं दिव्यानेकायुधायुधं॥स्फुरत्किरीटमुकुटं स्फुरन्मकरकुंडलं॥३६॥सका
न्ययवदं कांतं श्रीवत्सांकं महाभुजं॥सदा प्रसन्नवदनं घनश्यामं चतुर्भुजं॥३७॥पादसंवाहनपराल
क्ष्म्यानुष्टं मनोहरं॥तं दृष्ट्वा मुनयः सर्वे हर्षोत्कर्षसमन्विताः॥३८॥विष्णुं ते विष्णुसूक्तैश्च तुष्टुवुर्वेदसंभवै
॥एवं चैस्तुवतां तेषां विष्णुर्दीनानुकंपनः॥३९॥उवाच सुप्रसन्नेन मनसा द्विजसत्तमान्॥भो भोः कु
माराः सुष्ठोहं प्रदास्यामि यदपेक्षितं॥४०॥न विष्णुज्ञानयुताः अस्मद्दृष्टा मम मायया॥यस्मान्मोक्षार्थिभि

विप्राजलवासात्प्रमादिताः॥४१॥तस्मादिदंपरंतीर्थंमोक्षदंसर्वदामम॥अत्रैतुग्रस्यायत्नवतांयस्माच्च
कंमुदश्नुते॥४२॥निसृतंप्रथमंविप्राजलंत्त्वाममाग्रतः॥चक्रतीर्थमितिख्यातिंचक्रनाम्नानचि
ष्यति॥४३॥ममापिनियतंवासोत्रविष्णतिमहार्णवे॥यत्रस्नानंप्रकुर्वंतिप्रसंगेनापिमानवाः॥४४
चक्रतीर्थेद्विजश्रेष्ठास्तेषांमुक्तिकरेस्थिता॥नवंतोपिमदाद्यत्रनिवसध्वंद्विजर्षभाः॥४५॥वायुभू
तास्तरिक्षस्थाःसर्वकामप्रदायकाः॥४५॥प्रह्लादउ॥ ॥श्रुत्वातेहृष्टमनसःश्रुत्वाहंसुरपार्थिनी॥अ
वनिज्यहरेःपादौमूर्ध्नाचैनामधारयन्॥४६॥प्रक्षाल्यसततापादौप्रविष्टावरुणालयं॥तस्मात्पाप
हरगोमतीसागरसंगमे॥इत्युक्त्वाभगवान्विष्णुस्तत्रैवांतरधीयत॥सनकाद्याब्रह्मसुतास्तस्थुस्तत्र
समाहिताः॥४७॥एवंसागोमतीतत्रजातासागरसंगमे॥सर्वपापहराप्रोक्तापूर्वगंगेतियाश्रुता॥४८ १६
इतिश्रीप्रह्लादोक्तसंहितायांगोमतीमाहात्म्येनामपंचमोऽध्यायः॥ ॥५॥ ॥ऋषयऊचुः॥साधुसा

29
1964

धुमहाभागप्रह्लादसुरसत्तम॥येनत्वःकलिमध्येतुदर्शितोभगवान्हरिः॥१॥त्वन्मुखक्षीरसिंधूत्थाक
थेयममृतात्मिका॥कर्णाभ्यांपिबतांतृप्तिर्नमुनीनांप्रजायते॥२॥कथयस्वमहाबाहोतीर्थयात्रांसुवि
स्तरां॥अस्माभिस्तत्रगंतव्यंवदतेयत्रगोमती॥३॥तिष्ठतेभगवान्यत्रचक्रतीर्थेत्रिलोककः॥भवाब्धे
पतितांस्तातउद्धरास्मान्महार्णवे॥४॥तत्पूजाविधानंचकथयस्वमहामते॥श्रीप्रह्लादउ॥गत्वाच
गोमतीतीरेप्रणमेद्दंडवद्धरां॥५॥प्रक्षाल्यपाणिपादौतुबद्धाउकरयोःकुशान्॥गृहीत्वाचफलंश्रद्ध
अक्षतैश्चसमन्वितं॥६॥प्राङ्मुखःसंयतोभूत्वादद्यादर्घंविधानतः॥ब्रह्मलोकात्समायातेवसिष्ठतनये
शुभे॥७॥सर्वपापविशुद्ध्यर्थंदत्तमर्घंचगोमती॥वसिष्ठदुहितादेविब्रह्मक्रिडेप्रियेयशस्विनि॥८॥त्रैलो
क्यवंदितादेविपापंमेहरगोमति॥इत्युच्चार्यद्विजश्रेष्ठामृद्मालभ्यपाणिना॥९॥विष्णुसंस्मृत्यमनसामं
त्रमेतमुदीरयेत्॥अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे॥१०॥उद्धृतासिवराहेणकृष्णेनशतबाहुना

मृत्तिकाहर मे पापं यन्मया पूर्वसंचितं ॥११॥ त्वया हतेन पापेन सर्वपापैः प्रमुच्यते ॥ इत्येवं मृदमालभ्य स्ना
नं कुर्याद्यथाविधिः ॥१२॥ आपो अस्मानिति स्नात्वा स्नानजं यत्फलं लभेत् ॥ कुरुक्षेत्रे च यत्पुण्यं राहुग्रस्ते दि
वाकरे ॥१३॥ स्नानमात्रेण तल्लोके गोमत्यां तु समं निधौ ॥ स्नात्वा स्नात्वा च परया कुर्यात्कर्म यथोदितं ॥
॥१४॥ देवान् पितॄन् मनुष्यांश्च तर्पयेद्भावसंयुतः ॥ ये च रौरवसंस्था हि ये च कीटत्वमागताः ॥१५॥ गोम
तीतीरदानेन मुक्तिं यांति न संशयः ॥ विना पक्वान्नदर्भैश्च विना भावनया तथा ॥१६॥ वारिमात्रेण गोम
त्यां गयाश्राद्धफलं लभेत् ॥ ततश्च विप्रानाहूय वक्ष्यमाणांस्तर्पसंशयान् ॥१७॥ विश्वेदेवादिसंपूज्य पितृ
णां श्राद्धमाचरेत् ॥ श्रद्धया परया युक्तः श्राद्धं कुर्याद्विधानतः ॥१८॥ दक्षिणां च ततो दद्यात् सुवर्णं राज
तं तथा ॥ सुवर्णशृंगसहितं रजतखुरभूषितं ॥१९॥ रत्नपुच्छीवस्त्रयुतां ताम्रपृष्ठीसवत्सकां ॥ दद्याद्द्वि १७
प्रेभ्यः समभ्यर्च्य वस्त्रालंकारभूषणैः ॥२०॥ सप्तधान्ययुतां दद्यात् विष्णुर्मे प्रीयतामिति ॥ आसीमांते विप्र

ज्येतान् ब्राह्मणान्नियतः शुचिः ॥२१॥ दीनांधकृपणानां च दानं देयं स्वशक्तितः ॥ गोमती गोमयस्नानं गोदानं
गोपीचंदनं ॥२२॥ दर्शनं गोपिनाथस्य गकाराः पंच दुर्लभाः ॥ तस्मात्प्रयत्नेन कर्तव्यं गोदानं गोमतीतटे ॥२३॥
एवं कृते द्विजश्रेष्ठाः कृतकृत्यो भवेन्नरः ॥ ये गता नरके घोरे प्रेतत्वं ये गतास्तथा ॥२४॥ पूर्वकर्मविपाकेन
स्थावरत्वं च ये गताः ॥ पितृपक्षेपि ये केचिन्मातृपक्षेपि कुलोद्भवाः ॥२५॥ ते सर्वे दिविमायांतु गोमतीदर्शनात्
कलौ ॥ कृतं श्राद्धं नरैर्यस्तु गोमत्यां द्विजसत्तमाः ॥२६॥ हयमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयं ॥ गंगास्ना
नेन यत्पुण्यं प्रयागे परिकीर्तितं ॥२७॥ तत्पुण्यं समवाप्नोति गोमत्यां श्राद्धकृन्नरः ॥ विष्णुलोकं हि गच्छंति
पितरस्त्रिकुलोद्भवाः ॥२८॥ अनेकजन्मसाहस्रं पापं यांति न संशयः ॥ बाल्ये वयसि यत्कृतं पापं कर्मणा मन
सा तथा ॥२९॥ तत्सर्वं विलयं याति गोमतीदर्शनेन हि ॥ यो नरः कार्त्तिकस्नानं गोमत्यां कुरुते द्विजाः
॥३०॥ प्रसन्नो भगवांस्तस्य लक्ष्म्या सह न संशयः ॥ प्रसन्नः कृतलोकारं तर्पयेत्सुसमाहितः ॥३१॥ प्रस

31/1964

दंसोजनं देयं षड्रसं च द्विजातये॥ पूजयेच्च ततो देवं च प्रसन्नं भक्तितत्परः॥३२॥ येन केनापि विप्रेन्द्राः स्नान
ध्यनियमेन हि॥ ब्राह्मणानुज्ञया विप्राः कर्त्तव्यानियमं ततः॥३३॥ संपूर्णे कार्त्तिके मासि संप्राप्ते बुधवा
सरे॥ पंचामृतेन देवेशं स्नापयेत्तीर्थवारिणा॥३४॥ श्रीखंडं कुंकुमान्मिश्रं मृगनाभिसमुद्भवं। दद्याच्च
देवेशं भक्त्या दामोदरं हरिं॥३५॥ कुंकुमैर्वारिसंभूतैस्तुलस्या कणवीरकैः॥ तद्देशसंभवैश्चान्यैः पूजयेत्ग
रुडध्वजं॥३६॥ नैवेद्यं रुचिरं देयात्तत्क्षणो मे प्रीयतामिति॥ गीतवाद्यादिनृत्येन तथा पुस्तकवाचनैः
॥३७॥ रात्रौ जागरणं कार्यं स्तोत्रैर्नानाविधैरपि॥ आहूय ब्राह्मणान् भक्त्या भोजयेच्च स्वशक्तितः॥३८
ततो रथस्थितं देवं पूजयेद्गरुडध्वजं॥ कार्त्तिकान्ते च विप्रेन्द्रा गोमत्युदधिसंगमे॥३९॥ स्नात्वा च पितृसं
तर्प्य पूजयेच्च जनार्दनं॥ सुवर्णेन प्रणैश्चापि समभ्यर्च्य रमापतिं॥४०॥ अनुज्ञया तु विप्राणां व्रतं संपूर्ण २८
तां व्रजेत्॥ एवं ये स्नान्ति विप्रेन्द्राः कार्त्तिकं सकलं विधौ॥४१॥ सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजंति ते

माघस्नानं नरो भक्त्या गोमत्यां कुरुते तु यः॥४२॥ वैनतेयो ह्ययं भक्त्या संतुष्टः सद्गत्यार्पया॥ तिलास्तत्र हि
ण्यं देयं ब्राह्मणसत्तमाः॥४३॥ मोदका गुडसंमिश्राः प्रसन्नं दक्षिणान्विताः॥ तिलैराज्यप्लुतैर्होमः कर्त्तव्यः प्र
सन्नत्नैः॥४४॥ होमार्थी मे वये द्विजिंन तालार्थकदाचन॥ गोमत्यां स्नाति यो भक्त्या माघं माधववल्लभ
ं॥४५॥ समासौरक्तवस्त्राणि कंचुकोष्णीषमेव च॥ दद्यादुपानहौ चैव कुंकुमं च विशेषतः॥ कंब
लं तैलपर्कं च विष्णुर्मे प्रीयतामिति॥ स्वामिकार्ये गतानां च संग्रामे रिपुसंकुले॥४७॥ गवार्थे ब्राह्म
णार्थे च मृतानां या गतिः स्मृता॥ माघस्नानेन सा प्रोक्ता गोमत्यां नात्र संशयः॥४८॥ सर्वदानफलं त
स्मात्सर्वतीर्थफलं तथा॥ माघस्नानान्नरो याति विष्णुलोकं सनातनं॥४९॥ सर्वान्कामानवाप्नोति स
मभ्यर्च्य जनार्दनं॥ माघं स्नापयेत्माघ्यां गोमत्युदधिसंगमे॥५०॥ ब्राह्मणानुज्ञया विप्रा सर्वं संपूर्णतां व्र
जेत्॥ पापिनोपि द्विजश्रेष्ठा ये स्नान्ति गोमतीजले॥५१॥ यक्षिनां च गतिं यांति प्रसादाच्चक्रपाणिनः॥ ब्रह्मरूप

33/1964

द्वारूढ्यस्य देवचक्रपाणिनः ॥५२॥ स्नानमात्रेण तस्योक्तं गोमत्यां चक्रसंनिधौ ॥ मित्रद्रोही च यत्पापं यत्पापं
गुरुघातिनि ॥५३॥ तत्पापं समवाप्नोति यात्राविघ्नं करोति यः ॥ ब्रह्मस्वहारिणः पापं तथा देवस्वहारिणः ॥५
४॥ स्नानमात्रेण शुध्यंति गोमत्यां नात्र संशयः ॥ नीतान्नयपदानेन यत्पुण्यं लभते नरः ॥५५॥ तत्प्राप्नोति नि
संदेहो गोमतीनीरसंगमात् ॥ लभते पुत्रकामस्तु पुत्रानिष्टान्न संशयः ॥५६॥ धनकामस्तु विपुलं लभते धन
मूर्जितं ॥ प्राकाम्यादीप्सितान्कामान्गोमतीनीरसंगमात् ॥५७॥ जनजनसोन वेदिप्रामुच्यते पेटकात्र
णात् ॥ वाचा सततं मनसा सततं कर्मणा यत्पापार्जितं ॥५८॥ तत्सर्वं नश्यते पापं गोमतीनीरसंगमात् ॥ पीतांबर
धरो नूनात्याग रुडवाहनः ॥५९॥ वनमाली चतुर्बाहुदिव्यगंधानुलेपनः ॥ याति विष्णालयं विप्राश्चतु
नर्विलक्षणं ॥६०॥ गोमतीस्नानमात्रेण मानवो नात्र संशयः ॥६१॥ इति श्रीप्रह्लादोक्तसंहितायां द्वारका २५
माहात्म्ये षष्ठोऽध्यायः ॥ ॥श्रीप्रह्लाद उ॥ ततो गच्छेद्द्विजश्रेष्ठा रथांगाख्यं महोदधिं ॥ चक्रांको यत्र पाषाण

दृश्यंते मुक्तिदायकाः ॥१॥ यैः पूजितो जगन्नाथः शब्दः सांनिध्यात्तांव्रजेत् ॥ सदा नेत्रैरनिमिषैर्वी
क्ष्यतेपि जनार्दनः ॥२॥ यश्च साक्षाद्भगवतः शब्दहृष्ट्यावलोकितं ॥ तत्तीर्थं सर्वपापघ्नं चक्राख्यं
परमं हरेः ॥३॥ यस्य यत्र सिद्धिः परमा त्रैलोक्ये सचराचरे ॥ प्रयागादधिकं यच्च मुक्तिदं यत्स्थिपात
ने ॥४॥ सुरैरपि हि पूज्यंते यत्रांगानि मनीषिणां ॥ अंकितानां हि श्रीचक्रेण षण्मासैर्नात्र संशयः ॥
५॥ यत्र दृष्ट्वा मुच्यते पापात्प्रसंगेनापि मानवः ॥ यत्तीर्थं सर्वतीर्थानां प्रवरं पावनं तथा ॥६॥ तत्र
गत्वा द्विजश्रेष्ठा प्रख्यात्यचरणो मुदा ॥ करौ चावश्य च पुनः प्रणमेद्दंडवन्नतः ॥७॥ प्रणिपत्य गृहीत्वार्घं
पंचरत्नसमन्वितं ॥ सपुष्पाक्षतमिश्रं च गंधधेनुफलवंदनैः ॥८॥ संपन्नमर्घमादाय मंत्रमेनमुदी
रयेत् ॥ प्रत्यङ्मुखः सुनियतः सन्मुखो वा महोदधेः ॥९॥ ॐ नमो विष्णुरूपाय विष्णुचक्राख्य विश्रुतः ॥ गृ
हाणार्घं मया दत्तं सर्वकामप्रदो भव ॥१०॥ अग्निश्च ते योनिरिला च देहो रेतो विष्णुरमृतस्य नाभिः ॥ ए

35
1964

तक्रवनृपांउघसत्यवाक्यंमतोवगाद्देत्वपतिंनदीनां॥२१॥मृदमालत्यवजलंविप्राविप्रकरस्कृतं
॥धारयित्वाचशिरसास्नात्वाप्रणवपूर्वकं॥२२॥तर्पयेच्चपितॄन्देवान्मनुष्यांश्चयथाक्रमं।तर्प
यित्वाहविर्दद्यांमोक्षयित्वाचभक्तितः॥२३॥चक्रतीर्थेतीर्थवरेविशेषेणद्विजर्षभाः॥अश्वमेधस
हस्रेणसम्यकूयष्टेनयत्फलं॥स्नानमात्रेणतल्लोकंचक्रतीर्थेद्विजोत्तमाः॥२४॥कारयेच्चततश्रा
द्धंपिंडदानंश्रद्धयान्वितः॥विश्वेदेवान्समुद्दिश्यनिरंजनेनतथापितृत॥२५॥सुदृष्टान्नोजनेनैववस्त्रा
लंकारभूषणैः॥दीनांधकृपणेभ्यश्चदानंदेयंस्वशक्तितः॥२६॥चक्रतीर्थेतीर्थवरेविशेषेणद्विजर्ष
भाः॥रथदानंप्रकुर्वीतप्रीणनार्थंजगत्पतेः॥२७॥यंत्रीमनड्वाहयुतांसर्वाभरणभूषितां।सोपस्क
रांचविधायविष्णुर्मेप्रीयतामिति॥२८॥सुविनीतंशीलयुतंतथासोपस्करंहयं।भूषयित्वाचविप्राय २०
दद्याद्दक्षिणयासह॥२९॥एवंकृतेद्विजश्रेष्ठाःकृतकृत्योभवेन्नरः॥मुक्तिंप्रयांतितत्सैवपितरस्त्रि

कुलोद्भवः॥३०॥प्रेतयोनिंगतायेचयेचकीटत्वमागताः॥पश्वंतेनरकेयेचमहारौरवसंज्ञिके॥३१॥ते 37 / 1964
सर्वेमुक्तिमायांतिचक्रतीर्थप्रभावतः॥श्राद्धेकृतेद्विजश्रेष्ठागयाश्राद्धफलंलभेत्॥३२॥यागतिर्मा
ङ्गभक्तानांयज्विनांयागतिर्भवेत्॥चक्रतीर्थेद्विजश्रेष्ठास्तांस्नात्वाचलभेन्नरः॥३३॥श्राद्धंप्रशस्तं
विप्रेंद्रास्तेचेंदुसंक्षये।सूर्यपर्वणिविशेषेणकुरुक्षेत्रफलंलभेत्॥३४॥श्राद्धेस्नानेतथादानेपि
तॄणांतर्पणेकृते।प्रभासस्यसमंप्रोक्तंसोमपर्वैनसंशयः॥३५॥सर्वदापावनंविप्राश्चक्रतीर्थंन
संशयः॥यस्तुश्राद्धंप्रकुर्वीतयात्रायामागतोनरः॥३६॥चक्रांकितास्थतत्रोक्ताःसंप्रणमानवैःस
दा॥यैःपूजितैस्तुविप्रेंद्राविष्णुःसान्निध्यतांव्रजेत्॥३७॥वाचाकृतंमनकृतंकर्मणासमुपार्जितं।स्ना
नमात्रेणतत्सर्वंनश्यतेनात्रसंशयः॥३८॥इतिश्रीप्रह्लादोक्तसंहितायांश्रीद्वारकामाहात्म्येचक्र
तीर्थमाहात्म्यंनामसप्तमोऽध्यायः॥ ॥७॥ ॥प्रह्लादउवाच॥आगच्छंतुसुनंदीकलिंदीचाथसरस्वती॥

यत्रयत्रद्विजश्रेष्ठागोमत्युदधिसंगमं॥१॥हेलयाप्राप्यतेयत्रसर्वकामान्नसंशयः॥गोमतीजलक
ल्लोलैःक्रीडितेयत्रसागरः॥२॥पापघ्नंगोमतीनीरंप्राप्यतेयत्रतत्रवा॥सागरेणसमंमिश्रंमहापात
कनाशनं॥३॥गोमतीसंगतायत्रसागरेणद्विजोत्तमाः॥मुक्तिद्वारंतत्प्रोक्तंकलिकालेनसंशय
ः॥४॥नतुएयंलभतेष्टणंगंगायाःसागरगायाश्च॥संगमेनतदाप्रोक्तंगोमत्युदधिसंगमे॥५॥न
मस्कृत्यचनोयेशंगोमतीचसरिद्वरां॥अर्घंदद्याद्विधानेनजलात्वाचकरयोःकुशान्॥६॥मंत्रेणानेन
विप्रेंद्राःदद्यादर्घंविधानतः॥ब्राह्मणैःसहसंगत्यसदातत्तीर्थवासिभिः॥७॥नक्र्याचार्घंप्रदास्यामि
देवायपरमात्मने॥त्राहिमांनरकेघोरेनमस्तेविश्वरूपिणे॥८॥तीर्थराजनमस्तुभ्यंरत्नाकरमहा
णपर्सवि॥गोमत्यांसहितोदेवगृहाणार्घंनमोस्तुते॥९॥दत्वाचार्घंत्रिरवांबध्वासंस्मृत्यजलशायिनं॥ २१
कुर्यास्नानंप्राज्ञःसुखंःसनमनःप्रसन्नसुखंःसमया॥१०॥स्नात्वापरयाभक्त्यापितॄन्संतर्पयेत्ततः॥वि

श्वेदेवादिसंपूज्यपितॄणांश्राद्धमाचरेत्॥११॥यथोक्तांदक्षिणांदत्वाविष्णुर्मेप्रीयतामिति॥विप्रो 39/1964
षतःप्रदातव्यंसुवर्णंद्विजसत्तमः॥१२॥दंपत्योर्वाससीचैवकंचुकोष्णीषमेवच॥लक्ष्म्यासहजग
न्नाथोविष्णुर्मेप्रीयतामिति॥१३॥महादानानिसर्वाणिगोमत्युदधिसंगमे॥देयानिवैद्विजश्रेष्ठा॥
यदीच्छेत्श्रेयसात्मनः॥१४॥यस्तुजापुरुषंदद्यात्गोमत्युदधिसंगमे॥सप्तद्वीपपतिर्भूत्वाविष्णु
लोकेमहीयते॥१५॥आत्मानंतोलयेद्यस्तुसुवर्णेरजतेनवा॥वस्त्रैर्वापिकुंकुमैर्वापिफलैर्वापित
धारसैः॥१६॥नक्तानोगांस्तुविपुलांस्तथाकामानुमनोनुगान्॥संभुज्यमानस्त्रिदशैःयातिविष्णा
लयंनरः॥१७॥हिरण्यगर्भदानंतुब्रह्मांडंमेरुस्तथैवच॥गोमतीसंगमेस्नात्वासर्वान्कामानवाप्नु
यात्॥१८॥भूमिदानंचयोदद्यात्गोमत्यांसागरस्यच॥संगमेवस्तुवि:स्नात्वातस्माद्धन्यतरोनहि॥
१९॥कन्यादानंचयःकुर्याद्विद्यादानमथापिवा॥गोमत्याःसंगमेस्नात्वायातिब्रह्मपदंनरः॥२०॥यो

दद्यात्सुवर्णधेनुंहिघृतधेनुमथापिवा॥ब्रह्मांडदानमपिवातस्यपुण्यमनंतकं॥२१॥तथालवणधे
नुंचनीरधेनुमथापिवा।दत्वायातिपरंस्थानंगोमत्युदधिसंगमे॥२२॥युगादिषुचसर्वासुगोमत्यु
दधिसंगमे॥स्नात्वासंतर्प्यपितृन्अक्षयंलोकमाप्नुयात्॥२३॥आषाढ्यांचतथामाघ्यांकार्त्तिक्यां
संगमेनरः॥पितॄणांतर्पणंश्राद्धंस्नानंपाकप्रूजनं॥२४॥कुर्याद्विवतथादानंयदिच्छेदक्षयंनरः॥
पितॄणांचाक्षयातृप्तिर्गयाश्राद्धेनवैयथा॥२५॥श्राद्धपक्षेमहाभागागोमत्युदधिसंगमे।पंचकासु
द्विजश्रेष्ठतथावैवाष्टकासुच॥२६॥वैधृतेचव्यतीपातेछायायांकुंजरस्यच॥षष्ठ्यांचकपिलाख्या
यांतथाद्वादशीषुच॥२७॥गोमत्यासंगमेस्नात्वादत्वादानंस्वशक्तितः॥निर्मलंलोकमाप्नोतिय
त्रगत्वानशोचति॥२८॥श्राद्धपक्षस्यमावास्यागोमत्युदधिसंगमे॥हेलयाप्राप्यतेपुण्यंगोमतीच २२
क्रतीर्थयोः॥२९॥तस्मात्सर्वप्रयत्नेनअमावास्यांद्विजोत्तमाः॥श्राद्धंहिपितृपक्षांतेकार्यंगोमतिसं

गमे॥३०॥यद्यप्यश्रोत्रियंश्राद्धंयद्यप्युपहतंभवेत्।पक्षश्राद्धस्यतंपुण्यंदिनैकेनलभेन्नरः॥३१॥अ
न्नहीनंमंत्रहीनंपात्रहीनमथापिवा।द्रव्यहीनंकालहीनंमनसास्वाम्यवर्जितं॥३२॥श्राद्धपक्षस्य
मावास्यांगोमत्युदधिसंगमे॥परिपूर्णंभवेत्सर्वंपितॄणांतृप्तिरक्षया॥३३॥गोमतीकमलाचैवचं
द्रभागातथैवच।यत्रस्थासंगतानद्यःप्रविष्टावरुणालयं३४॥गयायांपिंडदानेनप्रयागेह्यस्थिपा
तने।तत्पुण्यंसमवाप्नोतिपक्षांतेश्राद्धतन्नरः॥३५॥यदीच्छेत्सर्वतीर्थेषुहेलयावाभिषेचनं।स्नानं
कुर्वीतनक्षत्रेवैगोमत्युदधिसंगमे॥३६॥पितृपक्षेसमग्रेतुपितृपूजांसतानियैः॥तेषांभवतिसंपू
र्णंगोमत्युदधिसंगमे॥३७॥अपुत्राचैवयानारीस्नानंकुर्याद्विधानतः।मृतपुत्रातथाविप्राःकाकवं
ध्याचयाभवेत्॥३८॥दोषैःप्रमुच्यतेसर्वैर्गोमत्युदधिसंगमे॥स्नात्वासुखमवाप्नोतिप्रजांचचिरजी
विनीं॥३९॥यानिकानिचदानानिपृथिव्यांसंभवंतिहि॥तानिसर्वाणिदेयानिगोमत्युदधिसंगमे

41/1964

॥स्नात्वासुखमवाप्नोतिप्रजन्मं॥४०॥सर्वदेवत्रविप्रेंद्राःसर्वपर्वविशेषतः॥स्नानंकुर्वीतनिष्पापोगो
मत्युदधिसंगमे॥४१॥दर्शनादेवपापस्यक्षयोभवतिवैद्विजः॥प्रणामेमनसस्तुष्टिर्भक्तिश्चैवावगा
हने॥४२॥श्राद्धंकृतेपितृणांतुष्टिर्भवतिशाश्वती॥दानेमनोरथाप्राप्तिर्भवेन्नात्रसंशयः॥४३॥स्ना
तस्नात्वामृतेधन्यायैःस्नातंपितृतर्पणं॥श्राद्धंचकृषिश्राद्धलिगोमत्युदधिसंगमे॥४४॥पितृपक्षे
चयेकेविद्येचमातृकुलोद्भवाः॥तथास्वसुरपक्षेचतथान्येमित्रबांधवाः॥४५॥तिर्यग्योनिगताये
चकीटत्वमागताः॥स्थावरत्वंगतायेचयेचप्रेतत्वमागताः॥४६॥पिशाचत्वंगतायेसुरूपत्वंगता
श्चये॥स्नानमात्रेणतेसर्वेमुक्तिंयांतिनसंशयः॥४७॥किंपुनःश्राद्धदानेनगोमतीसंगमेनरः॥स्ना
त्वामुक्तिमवाप्नोतिमानवोनात्रसंशयः॥४८॥श्रवणद्वादशीयोगसोमत्युदधिसंगमे॥परमंलोक २३
माप्नोतिसमस्सर्वचिवामतं॥४९॥संसन्सर्वतीर्थानिगोमत्युदधिसंगमे॥स्नानंस्नात्वातथास्रा

43/1964

वंस्नतत्स्तोभवेन्नरः॥५०॥सम्यक्स्नात्वानरोयस्तुपूजयेद्गरुडध्वजं॥पीतांबरधरोभूत्वादिव्या
भरणभूषितः॥५१॥चतुर्भुजधरोभूत्वावनमालाविभूषितः॥विमानःसुरस्त्रीभिःनागारि
समकेतनः॥५२॥संस्तूयमानोऋषिभिःयातिविष्णोरालयंनरः॥गोमतीसंगमेस्नात्वास्नतस्न
तोभवेन्नरः॥५३॥इतिश्रीप्रह्लादोक्तसंहितायांद्वारकामाहात्म्येगोमतीसंगमवर्णनोनाम
अष्ट सैसैमोऽध्यायः॥ ॥श्रीप्रह्लादउ॥ततोगत्वाद्विजश्रेष्ठासनत्कुंडांसुविस्तरां॥सर्वपापप्रशमनं
कृद्धिवृद्धिविवर्द्धनं॥१॥आराधितःसयदाहरिराविर्बभूवह॥संस्तूयमानोमुनिभिर्लक्ष्मीस
हजगत्पतिः॥२॥अहीणंहितदाचक्रुर्दर्शयेसुरनिम्नगां॥वामपार्श्वस्थितांपश्योऽभिषिक्तंसमु
द्यतां॥३॥सनकाद्याब्रह्मसुताःसमेतेमानसाद्विजाः॥पृथक्कुंडादास्नात्वासिषिचुःसागरोद्भवं॥४॥
ततोलक्ष्मीकृदाप्रोक्तादेव्यानाम्नेतिसंज्ञिताः॥प्रासेवापरस्मांतेरुक्मिणीसंश्रयेणतु॥५॥रुक्मि

णीकुंडमित्येतन्नूकलौ ख्यातिं गमिष्यति॥ नृगुणा सेवितं यस्मात्तत्तु तीर्थमनुत्तमं॥६॥ तस्मि-
न्स्नात्वा महाभागा प्रद्युम्नचरणौ मुदा॥ आचम्य च कुशान्गृह्य प्राङ्मुखो नियतः शुचिः॥७॥ संप
त्नेचार्घमादाय फलपुष्पाक्षतादिभिः॥ रत्नं च शिरसा न्यस्य मंत्रमेनमुदीरयेत्॥८॥ नमस्यार्घं
प्रदास्यामि कुंडे रुक्मिणि संज्ञिके॥ सर्वपापविनाशाय रुक्मिणाः प्रीणनाय च॥९॥ स्नानं कु
र्यात्ततो विप्राः स्नात्वा शिरसि तारकं॥ देवान्मनुष्यान्संतर्प्य पितॄंश्चैव विशेषतः॥१०॥ श्राद्धं ततः
प्रकुर्वीत विप्रान्नाहूय भक्तितः॥ दक्षिणां च ततो दद्यात्तत्तं रुक्ममेव च॥११॥ विशेषतः प्रदे
यानि फलानि रसवंति च। दंपत्योर्भोजनं दद्यान्मिष्टान्नेन द्विजर्षभाः॥१२॥ विप्रपंक्तिस्थमंप्र-
ज्ञास्त्रियश्चान्यास्व शक्तितः। कंचुके रक्तवस्त्रे च रुक्मिणी प्रीयतामिति॥१३॥ एवं स्नाते द्विजश्रेष्ठा २४
स्नात स्नातो भवेन्नरः॥ सर्वान्कामानवाप्नोति लक्ष्मीतस्य प्रसीदति॥१४॥ आरोग्यं मनसस्तुष्टि-

नचोद्वेगः कथंचन॥ पितॄणां चाक्षया तृप्तिः प्रजा भवति निश्चला॥१५॥ हीनसत्वो न च भवेन्नैव
स्यात्याचकः॥ आढ्यो भवति सर्वत्र यस्नातो रुक्मिणीकुंडे॥१६॥ गमनागमनं तस्याक्षंत्वमणांत
था॥ दुःखशोकौ कुतस्तस्य स्नातो रुक्मिणीकुंडे॥१८॥ सर्वपापविनिर्मुक्तो महाभयविवर्जितः
॥ सर्वकामयुक्तो याति नैव विष्णुपदं नरः॥१९॥ इति श्रीब्रह्मांडोक्तसंहितायां द्वारकामाहात्म्ये रुक्मि
णीकुंडदर्शनं नामाष्टमोऽध्यायः॥ ॥८॥ श्री ब्रह्म उ॥ ततो गच्छेद्द्विजश्रेष्ठः तीर्थं पापप्रणाश
नं॥ सकलाश्रमितिख्यातं तन्नृगतीर्थमनुत्तमं॥१॥ नृगो यत्र महीपालः सकलामवसुंधरः। स्त्रि
नमहसंगत्य श्वापपरमांगतिं॥२॥ ऋषय ऊचुः॥ नृगो नाम नृपः कोयं कथं ब्रह्मेन संगतः॥ क
मणा सकलाम सर्वं केन तद्वद विस्तरात्॥३॥ श्री ब्रह्मोवाच॥ नृगो नाम नृपो विप्रा सार्वभौमो बला
न्वितः॥ बुद्धिमान्धृतिमान्दक्षः श्रीमान्सर्वगुणान्वितः॥४॥ अनेकशतसाहस्रा नृपिपालाश्चत

45/1964

यशे॥ हस्त्यश्वरथसंमोघपतिर्निर्बर्हिर्निर्हतः॥५॥ सैन्यं च तस्य नृपतेः कोशं चैवाक्षयं तथा॥ म
तिर्यं तु गुरुभक्तश्च देवताराधने रतः॥६॥ महादानान्यदद्यात्स तु दिने नृप॥ सवत्सां गोसा
हस्त्रं तु ददाति नृपसत्तमः॥७॥ ब्राह्मणस्य चरणे भक्त्या उपवेश्य मनेश्वरे॥ परिक्षाल्य वाससा शु
भ्रेण सुगंधेनोपलिप्य च॥८॥ पुष्पमालाभिसंपूज्य धूपेनापि सुगंधिना॥ ददौ दक्षिणया सार्द्धं दद्दे
विप्राणां तदा॥९॥ तांबूलसहितां दत्वा विष्णुर्मे प्रीयतामिति॥ एवं प्रददतस्तस्य यजनश्च तथा
मखे॥१०॥ ययौ कालो द्विजश्रेष्ठा गोगाश्चैवानुजं प्रतं॥ एकदा तु द्विजश्रेष्ठं जैमिनिं शंसितव्रतं॥
११॥ श्रद्धया तं च नृपतिः प्रतिग्राह पराङ्मुखं॥ उवाच वाक्यं नृपतिः प्रांजलिपुटः स्थितः॥१२॥
मा मुह्य रमहाभाग कृपां कुरु कृपानिधे॥ गृहाण गां मया दत्तां दयां कृत्वा ममोपरि॥१३॥ ततस्त २५
त्वा वचनं तस्य अनिच्छन्नपि गौरवात्॥ नृपं स चाब्रवीद्विप्र एवमस्त्विति लज्जितः॥१४॥ अवनिज

ततः पादौ ततः स्वयं क्षालयन्नृप॥ सुवर्णशृंगसहितां रूप्यखुरविभूषितां॥१५॥ रत्नपुच्छीं कांस्य
दोहां सितवस्त्रावगुंठितां समां॥ सर्वविघ्नं ददौ दक्षिणया न्विताम्॥१६॥ आसीमांत मनुप्रज्य
तुष्टो राजा बहूवह॥ युवानां दंसवर्णिनां हंसीनामेति विश्रुतां॥१७॥ गां गृह्य स्वगृहं प्राप्तो दामस
बद्धां सवत्सकां॥ सतत्र यवसं सार्द्धं ददौ ब्राह्मणसत्तमः॥१८॥ सुदृसांयवसेनैव मध्याह्ने दूषितां
तदा॥ गृहीत्वा निर्ययौ विप्रो दामबद्धां जलाश्रयं॥१९॥ मार्गे गजाश्व संबाधे त्रस्ता सा उष्ट्रदर्शना
त्॥ सस्ता सा छिद्य साधेनुं ब्रह्मिणः सा ययौ तदा॥२०॥ विच्छिन्नकल्पा मुर्वीना पन्नयतां द्विजर्षभा॥
सा ययौ विद्रुता धेनुसुमहद्राजगोधनं॥२१॥ द्वितीये क्षिप्तन विप्रा नाकयन्नृपसत्तमः॥ सं पू
ज्य विविधवस्त्रैश्च वस्त्रालंकारभोजनैः॥२२॥ विधिवज्ज्ञां ददौ तां च स नृपः सोमशर्मणे॥ गृहीत्वा
राजन्नवत्वान्निर्ययौ गां द्विजर्षभाः॥२३॥ आगते समानो राजानं धर्मज्ञमिति वेद्विनः॥ प्रक्षादत्र॥

47/1964

॥सत्रविप्रोविविच्यान:सर्वतोगांसुदुःखितः॥२४॥ददर्शपथिगच्छंतींसोमशर्मासविस्मितः॥मामे
यंचापदष्ट्वालंदस्युवध्यामसेकथं॥२५॥सतस्यवचनंश्रुत्वा॥विस्मयंदस्युकीर्त्तनात्॥राजतो
हिमयालब्धागांनयामिस्वमंदिरं॥२६॥गोहर्त्तेतिमांकस्माद्ब्रवीषिलंद्विजर्षभः॥२७॥ब्राह्मणउ
॥मयापिराजतोलब्धाममेयंगौर्न्नसंशयः॥२७॥कथंनयसिविप्रत्वंममपिजीवतिमंदिरं॥सोब्रवी
द्यद्यलब्धेयंकथंमांकथसेरुषा॥२८॥गतेक्विवैमयालब्धाबलान्नेतुमिच्छसि॥ममेयमितिसंक्रु
द्धःसोमशर्माभ्यब्रवीद्वचः॥२९॥सद्यालब्धाक्रोधसांरक्तममेयमितिचापरः॥विवदंतौतथाविप्रौराज
द्वारमुपागतौ॥३०॥कुर्वाणौकलहंघोरंत्यक्तकामौस्वजीवितं॥संक्रुद्धौब्राह्मणौदृष्ट्वाशपंतौ
तौपरस्परं॥३१॥राज्ञेनिवेदयामासद्वास्थःप्रणयपूर्वकं॥अवज्ञातौतदाविप्रौविवदंतौरुषा २६
न्वितौ॥३२॥कामव्याकुलचेतस्कोविवेशांतःपुरंततः॥एवंविवदमानौतौत्रिरात्रंसमुपोषि

तौ॥३३॥अवज्ञातौनृपेणाथराजानंप्रतिचुक्रुधुः॥ऊचतुःकुपितौवाक्यंसामर्षंनृपतिंततः॥ 49/1964
३४॥अवमन्यसियस्मात्त्वंननिर्गच्छसिमंदिरात्॥शास्ताचवान्यजानांहिनन्यायेननियोजसि
॥३५॥भविष्यतिभवांस्तस्मात्कृकलासोनसंशयः॥एवंशप्त्वातदाविप्रावन्यस्मैगांप्रदायतौ॥३
६॥क्षुधितौस्वेदसंयुक्तौस्वगृहंगंतुमुद्यतौ॥तत्रस्थितौतौनृगोसारंतदाददृशामफपस्थितः॥३७॥
दंडवत्प्रणिपत्याथसतांजलिरभाषत॥अमोघावचनायूयंतन्मथानतद्व्यथा॥३८॥ममोपरि
शपांतत्वाशापांतमुपदिश्यतां॥तस्यतद्वचनंश्रुत्वासोमशर्माभिवाचस॥३९॥द्वापरस्ययुगस्यां
तेभगवान्देवकीसुतः॥वसुदेवगृहेसाक्षात्हरिराविर्भविष्यति॥४०॥तस्यसंस्पर्शनादेवपापमु
क्तिर्भविष्यति॥इत्युक्त्वातौतदाविप्रौयायातौस्वनिवेशनं॥४१॥राजाबहुविधान्भोगान्भुक्त्वाद
त्वाचभूरिशः॥इष्ट्वाचविविधैर्यज्ञैःकालधर्ममुपेयिवान्॥४२॥ततःसगतवान्दिव्यंधर्मराजनि

वेशानं॥सकृतो धर्मराजेन स्वागतेन नृपोत्तमः॥४३॥ यत्त्वं सुसुस्नातं राजन्न यथावद्धःस्नातं विनो॥
यद्यस्थिद्धःस्नानं किंचित्तकलाः सम वाससवान्॥४४॥ एकस्मिन् दिवसे विप्राः सर्वे यदुकुमारकाः॥व
नं जग्मुर्मृगान् हंतुं रामस्त्रस्थसमन्विताः॥४५॥ तृषान्विता स्थमध्या कोगर्त्ते नीरं सुनिर्मलं॥सत्वंसु
महन्तत्र कृकलासं च संस्थितं॥४७॥ चक्रुश्चोद्धरणे तस्य यत्नं यदुकुमारकाः॥ श्रान्तप्रमाणं सत
दा गुरुत्वात्सचचाल ह॥४८॥ यदा नत्रोक्तस्ते सर्वे आहुः लक्ष्मणं समयो॥ ददर्शितं तदा लक्ष्मोष्टांम
त्वास्वपन्निव॥४९॥ चिक्षेप वामहस्तेन लीलयैव जगत्पतिः॥ स संस्पृष्टो भगवता निर्मुक्तः शापबं
धनात्॥५०॥ त्यक्त्वा कलेवरं राजा दिव्यस्रगनुलेपनः॥ स्तत्वांजलिं कृत्वा वेदं भक्त्या परमयायुतः
॥५१॥ नमस्ते जगदाधार सर्वास्थित्यंतकारिणे॥ महस्त्रशिरसे तुभ्यं ब्रह्मणे नंतशक्तये॥एवं २७
संस्तुवतस्तस्य भगवान् देवकीसुतः॥ तुष्टोहं ते वरं दास्ये यत्ते मनसि वर्तते॥५३॥ यो हि पुण्यतता

51/1964

न्लोकान् दर्शनात्स्पर्शनाद्यवै। एवमुक्तः स देवेन संहृष्टस्तं नृपः॥५४॥ उवाच यदि तुष्टोसि
यदि देयो वरो मम॥ गंगाद्रीयं मम नाम्ना च ख्यातिं गच्छतु केशव॥५५॥ यः स्नात्वापरया भक्त्या पितृ
न् संतर्पयिष्यति॥ स्वस्त्रसादेन गोविंद विष्णुलोकं स गच्छतु॥५६॥ एवं भविष्यतीत्युक्त्वा तत्रैवां
तरधीयत॥ स च राजा विमानेन दिव्यस्रगनुलेपनः॥५७॥ जगाम भवनं विष्णोर्विबुधैरनुसत्कृ
तः॥ श्रीभक्तादउ॥ तदाप्रभृति विप्रेंद्राः तत्र कूपो नृगाश्रमात्॥५८॥ वरप्रदानात्कृष्णस्य पावन
ः सर्वदेहिनां॥ तत्र गत्वा द्विजश्रेष्ठाः अर्घं दत्वा विधानतः॥५९॥ फलपुष्पाक्षतैर्युक्तं चंदनेन च वन्
पुराः॥ नमस्ते विश्वरूपाय विश्वतेपरमात्मने॥६०॥ अर्घं गृहाण देवेश कूपेस्मिन् नृगसंज्ञिके॥
ततः स्नात्वा द्विजश्रेष्ठाः मृदमालभ्य पाणिना॥६१॥ संतर्पयेत्पितॄन् देवान् मनुष्यांश्च यथाक्रमं
॥ ततः श्राद्धं प्रकुर्वीत पितृणां श्रद्धयान्वितः॥६२॥ विप्रेभ्यो दक्षिणां दद्यात् भोजनं च स्वशक्ति

ता॥ विशेषतः प्रदातव्या सवत्सा गौः स्वलंकृता॥६३॥ शय्यां सोपस्करां दद्यात् विष्णुर्मे प्रीयतामि
ति॥ दीनांधकृपणानां च सदा पितीर्थसेविनां॥६४॥ दद्याद्दानं स्वशक्त्या च वित्तशाठ्यविवर्जि
तं॥ स्नानमात्रेण विप्रेंद्राल्लभेज्जो दानजं फलं॥६५॥ पितृणां श्राद्धदानेन विनयोनिं व्रजंति
॥ सकलाः सप्त तं श्राद्धं येनरैस्तर्पणं तथा॥६६॥ स गच्छेद्विष्णुलोकं तु पितृभिः सहितो नरः॥ तथा
मनोरथाः प्राप्तियात्रा च सफला भवेत्॥६७॥ सर्वतीर्थफलावाप्तिर्भवेत्तेनात्र संशयः॥ इति श्री
प्रह्लादोक्तसंहितायां श्रीद्वारकामाहात्म्ये इष्टकलामवर्णनो नाम नवमोऽध्यायः॥ ॥श्रीप्र
ह्लाद उ॥ ततो गच्छेद्द्विजश्रेष्ठा तीर्थे विष्णुपदोद्भवे॥ यस्य दर्शनमात्रेण गंगास्नानफलं लभेत्॥
यस्योत्पत्तिर्मया पूर्वं कथिता द्विजसत्तमाः॥ यस्य संस्मरणाद्देव कीर्तनात्पापसंक्षयः॥२॥ हरि २८
णा यास्समानीता रुक्मिणार्थे महात्मना॥ यस्यागंडूषमात्रेण हयमेधफलं लभेत्॥३॥ वि

ष्णोः पादप्रसूता या वैष्णवीति च विश्रुता॥ तत्र गत्वा महाभागा गृहीत्वार्घं विधानतः॥४॥ नम
स्तेत्वां भगवति विष्णुपादतलोद्भवे॥ गृहाणार्घमिदं देवि गंगे त्वं हरिणा सह॥५॥ इत्युक्त्वा यद्विज
श्रेष्ठा मृदमालभ्य पाणिना॥ प्राङ्मुखः संयतो भूत्वा स्नानं कुर्याज्जितेंद्रियः॥६॥ देवान्पितॄन्मनु
॥ष्यांश्च तर्पयेदक्षततिलैः॥ उपाहृत्योपहारांश्च आहूय ब्राह्मणांस्तदा॥७॥ दीनांधकृपणेभ्य
श्च दानं देयं स्वशक्तितः॥ विशेषतः प्रदातव्यं सुवर्णं द्विजसत्तमाः॥८॥ श्रद्धया परया युक्तः श्राद्धं कु
र्याद्विचक्षणः॥ यथोक्तां दक्षिणां दद्यात्सुवर्णरजतं तथा॥९॥ उपानहौ ततो देयो जलकुंभं
द्विजातये॥ दध्योदनं सलवणं शाकक्षीरकसंयुतं॥१०॥ रक्तवस्त्रैः कंचुकादिरुष्णीषैः परिधापये
त्॥ विप्रपत्नीश्च विप्रांश्च विष्णुर्मे प्रीयतामिति॥११॥ एवं कृते द्विजश्रेष्ठाः कृतकृत्यो भवेन्नरः॥ पितॄ
णां च कृतया तृप्तिर्गयाश्राद्धेन वै यथा॥१२॥ वैष्णवं लोकमाप्नोति पितरस्त्रिकुलोद्भवाः॥ जीवते च

53/1964

श्रियायुक्तः पुत्रपौत्रसमन्वितः॥१३॥ प्रीतः सदा भवेत्तस्य रुक्मिण्या सह केशवः॥ यच्छेत्तेवांछि
तान्कामानैहिकामुष्मिकान्प्रभुः॥१४॥ एतन्माहात्म्यमतुलं विष्णोः पादोदकस्य च॥ यः शृणो
ति नरो भक्त्या सर्वपापैः प्रमुच्यते॥१५॥ इति श्रीप्रह्लादोक्तसंहितायां श्रीद्वारकामाहात्म्ये वि
एकादशो ष्णुपदवर्णनो नामा दशमोऽध्यायः॥ ॥७॥ श्रीप्रह्लाद उ॥ ततो गच्छेद्द्विजश्रेष्ठा गोप्रचारमतः
परं॥ यत्र स्नात्वा नरो भक्त्या लभेद्गोदानजं फलं॥१॥ यत्र स्नाति प्रगन्त्वा यो नमस्येद्देवतैर्वृतः॥
कोटिदानं च तस्योक्तं द्वादश्यां द्विजसत्तमाः॥२॥ ऋषय ऊचुः॥ कथं तु तत्र देवेंद्र ह्यभवेत्कोपि सं
ज्ञकं॥ तीर्थं कथय नस्तेन येनायाति जनार्दनः॥३॥ प्रह्लाद उ॥ हते कंसे नोजराजे स्तेनामित
तेजसा॥ उग्रसेने नाभिषिक्ते मधुपुर्यां महात्मना॥४॥ उद्धवं प्रेषयामास गोकुलं गोकुलप्रियः॥ २९
सुहृदां प्रियकामार्थं गोपगोपीजनस्य च॥५॥ स नमस्कृत्य गोविंदं प्रययौ नंदगोकुले॥ स तत्
मादत्त्रपवेषेण वस्त्रालंकारभूषणैः॥६॥ तं दृष्ट्वा दिवसस्यांते गोविंदानुचरप्रियं॥ उद्धवं प्रज 55/1964
यामासुर्वस्त्रमाल्याहरणादिभिः॥७॥ तं तु कृष्णं तं विश्रांतं पप्रच्छ यशोदा पुत्रवत्सला॥ वंदत्सुबाष्पपूर्णा
क्षः पप्रच्छ नामयं हरेः॥८॥ कच्चिचां दास्ते सुखं पुत्रो रामस्त्वं नोपहन्नम॥ कच्चित्स्मरति गोविंदो
वयस्यान्गोपबालकान्॥९॥ कच्चिद्देत्रपति गोविंदो गोष्ठं समधुरेश्वरः॥ नायिष्यति नः पुत्रो गो
कुलं वृजिनार्णवात्॥१०॥ इत्युक्त्वा बाष्पपूर्णाक्षी यशोदा नंद एव च॥ रुरुदतुः सुस्वरं दीनौ पुत्रस्ने
हवशंगतौ॥११॥ उद्धवस्तु ततो दृष्ट्वा प्राणसंशयमागतौ॥ मधुरैस्तथ्यसंदेशैः स्नेहयुक्तैरजीवयत्
॥१२॥ नमस्करोति भगवान्भवतं च महाग्रजः॥ अनामयं पृच्छति वां तौ च क्षेमेण तिष्ठतः॥१३॥
क्षिप्रमेष्यति दाशार्हो रामेण सहितः प्रभुः॥ अत्रागत्य जगन्नाथो विश्वस्य तिमवोदितं॥१४॥ इ
त्येवं तथ्यसंदेशैः समाश्वास्य तदोद्धवः॥ सुखं सुष्वाप तत्रायनं नंदाद्यैरभिनंदितः॥१५॥ गोप्यस्त्व

द्वारथं दृष्ट्वा हरेर्नंदस्य विस्मिताः॥ कोयं कोयमिति प्राहुः सख्या गमनशंकया॥१६॥ गोपाऽरा
जस्य गृहे रथेनादित्यवर्चसा॥ समागतो महाबाहुः सख्ये वेषादृशः सदा॥१७॥ परस्परं समागत्य
सर्वास्ता व्रजयोषिताः॥ विवक्षैः सख्य ह्रतनाः पप्रच्छुः शोककर्शिताः॥१८॥ गोप्य ऊचुः॥ कस्मा
त्वमिह संप्राप्तः किं ते कार्यमिहाद्य वै॥ दस्युरूपप्रतिछन्नो अस्मान् किं हंतुमिच्छसि॥२०॥ पूर्वमि
व हतं तेन सख्येन हृदयादिकं॥ पायपित्वाधरविषं योषितप्राणी कथं गतः॥२१॥ इत्येवमुक्त्वा
तागोप्यो मुमुहुः शोकविह्वला॥ इथ्यंत्यः सख्य द्यमंतं प्रेपतउद्धरणीतलं॥२२॥ उद्धवस्तं जनं दृ
ष्ट्वा सख्य स्नेहसत्ताशयं॥ आश्वासयामास तदा वाक्यैः श्रोत्रसुखावहैः॥२३॥ उद्धव उ॥ भगवान्
पि दाशार्हः किं दर्पशरपीडितः॥ नमुंचेन स्वपिति च चिंतयन् वस्त्वदर्शिनं॥२४॥ तत् श्रुत्वा वचनं ३०
तस्य ललिता क्रोधमूर्छिता॥ उद्धवं ताम्रनयना सोवाच रुदती तदा॥२५॥ ललिता उ॥ असत्वा

त्विन्नमर्यादक्रूरक्रूरजनप्रियः॥ माश्रयाश्मन्तुरतः कथां तस्याप्तनात्मनः॥२६॥ धिक्क्रूरपा
पसमाचारो धिक्सौ निष्ठुराशयः॥ इत्यापत्त्वा जनमूढो गतो द्वारवतीं हरिः॥२७॥ श्यामला
उ॥ किं तस्य मंदभाग्यस्य श्रुत्वा पुण्यस्य दुर्मतिः॥ मा कुरुध्वं कथा साध्व्यः कथाः कथयतापराः॥
२८॥ धन्या उ॥ केनायं हि समानीतो हतो भ्रष्टजनस्य च॥ यांतु ते न पथा पापः पुनर्नायाति येन व
॥२९॥ विशाखा उ॥ न शीलं न कुलं यस्य ज्ञायते जन्म कर्म च॥ हीनस्य पुरुषार्थेषु तेन संगो निर
र्थकः॥३०॥ राधा उ॥ पूतनाहनने यस्य नास्ति पापस्य संभवं॥ तस्य स्त्रीहनने साध्व्यः शंका का
पि न विद्यते॥३१॥ शैव्या उ॥ सत्यं ब्रूहि महाभाग किं करोमि यदूत्तम॥ संहृतो नागरस्त्रीभिः कथ्या
स्माकं करोति किं॥३२॥ पद्मा उ॥ कदोद्धव महाबाहो नागरीजनवल्लभः॥ समेष्यति दशार्हः प
द्मपत्रायतेक्षणः॥३३॥ भद्रा उ॥ हा सख्य गोपवर हा व्रजगोपीजनवल्लभ॥ समुद्धर महाबाहो गो

57
1964

प्यः संसारसागरात् ॥ ३४ ॥ श्रीशुक उवाच ॥ इति ता विविधैर्वाक्यैर्विलपंत्यो व्रजस्त्रियः ॥ रुरुदुः सु
स्वरं देव्यः स्मरं देव्यः स्मरंत्यः कृष्णचेष्टितं ॥ ३५ ॥ तासां तदुदितं श्रुत्वा भक्तिं च स्नेहसंगतां ॥
विस्मयं परमं गत्वा साधु साध्विति चाब्रुवन् ॥ ३६ ॥ उद्धव उ ॥ यन्न ब्रह्मा न च हरो न देवा न मह
र्षयः ॥ स्वभावमनुमगलिसर्वधन्या व्रजस्त्रियः ॥ ३७ ॥ सर्वासां सफलं जन्म जीवितं यौवनं धनं
॥ यासां भवेद्भवति भक्तिरव्यभिचारिणी ॥ ३८ ॥ गोप्य ऊचुः ॥ साधु दर्शय गोविंदं साधु दर्शय वल्ल
भं ॥ नयनः साधु तत्रैव यत्र तिष्ठति सोच्युतः ॥ ३९ ॥ तासां तद्भाषितं श्रुत्वा तथा विलपितं बहु ॥
बाढमित्येव मित्यूचे उद्धवः स्नेहविह्वलः ॥ ४० ॥ उद्धवेन समं सर्वास्ता व्रजयोषितः ॥ अनुजग्मु
र्मुमुदा युक्ता कृष्णदर्शनलालसाः ॥ ४१ ॥ गायंत्यः प्रियगीतानि तद्बाल्यचरितानि च ॥ जग्मुः संदे ३१
वज्ञानके उद्धवेन व्रजांगनाः ॥ ४२ ॥ यदुक्तापि तत्तो दृष्ट्वा उद्यानवनराजयः ॥ अद्य देवं प्रप

श्यामः परस्परमथाब्रुवन् ॥ ४३ ॥ चारवत्यानुगमनानुध्यानाद्दत्र रक्ष्मीपतेस्सदा ॥ अत्रोपकिंचि
षामुक्ता विध्वस्ता गोपबंधनाः ॥ ४४ ॥ संप्राप्तास्तास्तवः सर्वास्तीरे सपय सरस्यथ ॥ उद्धवस्तान्न
मस्कृत्य गोपिकाः कृष्णदेवताः ॥ ४५ ॥ स्थीयतामत्र मे मानस्त्रैष्यति महाभुजः ॥ कृष्णः कमल
पत्राक्षो विश्वस्यति सवोदितं ॥ ४६ ॥ गोप्य ऊचुः ॥ कस्मादिदं चात्र सरः सारसशोभितं ॥ सं
प्रफुल्लपंकजैश्चित्रं कल्हारकुमुदोत्पलैः ॥ ४७ ॥ उद्धव उ ॥ मयो नाम महामहादैत्यो मायावी लोक
विश्रुतः ॥ तं तेन सरः पुण्यं तस्य नाम्ना च विश्रुतं ॥ ४८ ॥ गोप्य ऊचुः ॥ शीघ्रमानय गोविंदं साधु
दर्शय वल्लभं ॥ नयनानंदजनकं तापत्रयविनाशनं ॥ ४९ ॥ तत् श्रुत्वा वचनं तासां गोपिकानां तदो
द्धवः ॥ तैः संमानयामास कृष्णशीघ्रानुपायि ॥ ५० ॥ आयांतं तत्र यानेन दृष्ट्वा देवकिनंदनं ॥ त्वाज
मानं सवसुधुषा वनमालाविभूषित ॥ ५१ ॥ ज्वलत्किरीटमुकुटं स्फुरन्मकरकुंडलं ॥ श्रीवत्सां

57
1964

म
कंमहार्बुद्धिपालकोशेषवासः ॥५२॥ आतपत्रमहर्षेस्तु संहृतं वृष्णिपुंगवैः ॥ संस्तुतं वंदिमुख्यै
श्च गीतवादित्रनिःस्वनैः ॥५३॥ पौरजानपदैर्लोकैर्वीक्षितो हृतं ॥ सपत्रपत्रं हंससमिथुनैः
सरः सारसशोभितं ॥५४॥ तं दृष्ट्वा च कृतमायां तं लोककांतं मनोहरं ॥ प्रियं प्रियाप्रियं दृष्ट्वा
मुमुहुस्तां व्रजांगनाः ॥५५॥ चिराल्लब्ध्वा मवाप्तुस्ता विलप्तु मुपचक्रमुः ॥ हानाथ कांत हा स्वा
मिन्हा व्रजेश मनोहर ॥५६॥ संवर्द्धितो सियै बाल्ये क्रीडितो वत्सबालकैः ॥ ते पि त्वया परि
त्यक्ताः कथं दृष्टोसि निर्घृणः ॥५७॥ न ते धर्मो न ते मोहा दूंतसो त्वं सत्यमेव च ॥ पितृमातृपरि
त्यागी कथं यास्यसि सत्कृतिं ॥५८॥ स्वामिभक्तिपरित्यागः धर्मशास्त्रेषु गर्हितः ॥ त्यजतास्मा
न्वने वीरत्वं नावेक्षितं त्वया ॥५९॥ श्रीप्रह्लादउ ॥ श्रुत्वा तासां विलपितं गोपीनां नंदनं ३२
दनः ॥ अनन्यशरणाः सर्वा भावज्ञो भगवान्प्रभुः ॥६०॥ प्रोवाच मां त्वयनु सर्वान्व्रजेशस्ता

व्रजांगनाः ॥ अध्यात्मनिष्ठ्यो गोपी न तु स्ता अन्वतिष्ठ्यपत ॥६१॥ श्रीभगवानुवाच ॥ भवती
नां वियोगो मे कदाचिदपि नैव हि ॥ वसामि हृदयं शश्वत्भूतानामविशेषतः ॥६२॥ अहं
सर्वस्व प्रभवो मत्तो देवाः सवासवाः ॥ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ॥६३॥ ब्रह्मा
विष्णुश्च रुद्रश्च शक्तिराद्या महर्षयः ॥ इंद्रियाणि मनो बुद्धिः संघात सत्वं रजस्तमः ॥६४॥ काम
क्रोधश्च लोभश्च मोहोहंकार मेव च ॥ एतत्सर्वमशेषेण मत्तो गोप्यः प्रवर्तते ॥६५॥ एतत्ज्ञा
त्वा महाभागा मा स्म शोके मनः स्तथां ॥ सर्वस्थलेषु मां नित्यं चिंतयध्वमकिल्बिषा ॥६६॥ ना
:स्तस्य वचनं श्रुत्वा गोप्यो विध्वा— बंधनाः ॥ विमुक्तसंशयक्लेशा दर्शनानंदसंकुलाः ॥६७॥ ऊ
चु गोप विध्वस्ताः स्तस्य दर्शनि निश्चलाः ॥ अद्य नः सफलं जन्म अद्य नः सफला दिशाः ॥६८॥ यस्त्वां
पश्यामि गोविंद नागरीजनवल्लभः ॥ पुण्यहीना न पश्यंति त्रसत्तारं पुरुषं परं ॥६९॥ वाक्ये

81/1964

हैत्वर्थसंयुक्तैःयदिदिसंबोधितात्वया॥तथापिमायाहृदयान्नापैतिमधुसूदनः॥७०॥श्री
सूतउ॥दर्शनादस्यसरसोविमुक्ताशेषबंधनात्॥स्नानाश्चसकलान्कामानवाप्स्य
त्यव्रजांगनाः॥७१॥गोप्यऊचुः॥अस्यकृतस्नानावत्सेसरस्यास्यफलंहरे॥विधिश्चब्रूहिजगत्
नाथविस्तराद्वृष्णिनंदन॥७२॥श्रीसूतउ॥नवनीतंमयासार्द्धमिद्यसंजातदर्शनं॥तस्मा
न्मयासदाह्यत्रस्नातव्यंनियमेनहि॥७३॥यःस्नात्वापरयाभक्त्यापितॄन्संतर्पयिष्यति॥अ
वशास्यसितेपक्षेश्राद्धरूपांनियतःशुचिः॥७४॥दत्वादानंस्वशक्त्याचमासुद्दिश्यतथापितॄन्
॥वसतेवैष्णवंलोकंपितृभिःपरिवारितः॥७५॥गृहांधकूपेपतितंमायापाशैर्नियंत्रितं॥मा
मुद्धरस्वहीनाथगृहाणार्घ्यंनमोस्तुते॥७६॥स्नात्वाचपरयाभक्त्यापितॄन्संतर्प्यमानवः॥कु ३३
र्याच्छ्राद्धंचपरयापितॄणांभक्त्यासमन्वितः॥७७॥दक्षिणांचततोदद्यात्रजतंरुक्ममेवच॥वि

63/1964

शेषतःप्रदातव्यंपायसंशर्करंमधु॥७८॥नवनीतंघृतंतक्रंकंबलाजिनमेवच॥नवनीति
ःसमंयस्मात्नामसंजातदर्शनं॥७९॥आगंतव्यंमयायस्मात्सदाह्यस्मिन्जलागमे
॥योऽत्रस्नानंप्रकुरुतेसरस्यस्मिन्मयासह॥८०॥गंगास्नानफलंतस्यविष्णुलोकंतथाक्ष
यं॥मुक्तिंप्रयातितत्रैवपितरस्त्रिकुलोद्भवाः॥८१॥पुत्रपौत्रसमायुक्तोधनधान्यसमन्वि
तः॥भुक्त्वाभोगान्सुविपुलान्अंतेविष्णुपुरंव्रजेत्॥८२॥इतिश्रीप्रह्लादोक्तसंहितायांद्वा
रकामाहात्म्येमायासरवर्णनोनामद्वादशोऽध्यायः॥ ॥३॥ ॥श्रीप्रह्लादउ॥इतिश्रु
त्वावचःकृष्णाद्गोप्यःसंहृष्टमानसाः॥तस्मिन्मायासरेस्नात्वाविमुक्ताशेषबंधनात्॥१॥तस्य
संदर्शनसंजाताःपरमाह्लादसंयुताः॥ऊचुश्चवचनंगोप्योमधुरंमाधवंप्रति॥२॥धन्याःस्मदे
त्यप्रवरोमयोपेनस्नातंसरः॥यस्मिन्त्वंदेवतैःसार्द्धमिमेष्यतिजगत्पते॥३॥यदिदृष्टोसिन

गवान्नद्यनुग्राह्यास्म वो यदि ह्यस्माकमपि वाञ्छितं कारयस्व सरोत्तमं ॥४॥ कीर्त्तनात्तु मर्त्य
लोकेस्मिन्नत्रयात्वं दर्शने नहि ॥ अहर्निशं तव ध्यानो यास्यामः परमां गतिं ॥५॥ श्रीभ॰उ॰ ॥
करिष्ये वः प्रियं साध्व्यो यूयं मम परिग्रहः ॥ अनुग्राह्या मया नित्यं भक्तिग्राह्योस्मि सर्वदा ॥६
॥ ब्रह्मोवाच ॥ इत्युक्त्वा भगवान्शौरिः गोपीनां हितकाम्यया ॥ संनिधौ सरसस्तस्य सर
स्तस्य च कारह ॥७॥ नदस्य गाधं स्वच्छजलं नलिनीदलशोभितं ॥ हंससारससंयुक्तं चक्रवाको
पशोभितं ॥८॥ कुमुदोत्पलकह्लारैः पद्मिनीखंडमंडितं ॥ सेवितं द्विजमुख्यैश्च सिद्धविद्या
धरैस्तथा ॥९॥ सेवितं यदुनारीभिः तथा यदुकुमारकैः ॥ दिवारात्रौ सुरूपैस्सर्वजान
पदैर्जनैः ॥१०॥ तं दृष्ट्वा जलकल्लोलैः सुसंपूर्णं शिलाश्रयां ॥ हर्षाद्गोपीजनं तस्य उवाच वचनं ३४
तदा ॥११॥ पश्यध्वं गोपिकाः शुभ्रं सरो मम समीपतः ॥ स्वच्छमिष्टजलापूर्णं मज्जनानां यथा

मतः ॥१२॥ कारणाद्भवतीनां च यस्मात्कृतमिदं सरः ॥ भवतीनां तथा नाम्ना ख्यातिं लोके
गमिष्यति ॥१३॥ गोपांश्चापि च कान्ताश्च भवतीभिर्मया सह ॥ गोपसरेति वै नाम ख्यातिं लोके
गमिष्यति ॥१४॥ अनुग्राह्या यदि वयं यस्मान्नाम्ना कृतं सरः ॥ अन्यत्किमपि वाञ्छितं यः ज्ञापय
मो वदस्व नः ॥१५॥ युष्माकं प्रियकामार्थं यस्मात्कृतमिदं सरः ॥ तस्माद्गोपीसर इति लोके
गमिष्यति ॥१६॥ श्रीभ॰उ॰ ॥ प्रार्थितं यदसि येतं त्वो मनसि वर्त्तते ॥ तच्छ्यास माय ता यूयं ना
प्तिदेयं ततो मया ॥१७॥ गोप्य ऊचुः ॥ यदि तुष्टोसि भगवान् यदि देयो वरो समहिय ॥ तस्मात्
यात्र सदा स्नानस्यास्मिन् माधवः ॥१८॥ या गत्वा चैतस्मिन् स्नातव्यं नियमेन हि ॥ यत्र त्वं दं देवतास्त्वत्र य
ज्ञास्तीर्थानि केशव ॥१९॥ यत्र गात्रदायानि व्रतानि नियमास्तथा ॥ सुकारश्च वषट्कार :स्वाहाका
रस्वधास्तथा ॥२०॥ नृत्तं च स्वमहत्त्वैकिः जनस्य सर्व तपस्तथा ॥ तन्मयदिवसन्नासदेवासु

रमानुषं॥२१॥तस्मात्पिजगन्नाथ्यत्रस्नातोजनार्दनः॥स्नानमत्रत्रिभुवनंनविष्यतिनसंश
यत॥२२॥त्रैलोक्यपाविनीतेपानवणदत्तपंहेतनत्।लक्ष्मीर्वक्षस्थलस्थाभिमुखेदेवीसरस्वती।२३।सर्व
भूतमयश्चात्रस्नानस्नाऊगदीश्वरः।यददामिमनुष्याणांज्ञाविनांहिकलौयुगेन्नपांतःजगत्सते॥त्रापा तद्दस्नमत्र हीं
त्रायामागतानांचयत्फलंतद्वदस्वगान॥२४॥ यत्फलंहिमनुष्याणांस्नातानांपिकासरे।तनूश्च
णुष्वमसंदिग्धंप्रसन्नेमयिगोपिका॥२५॥सोपस्करांसवत्सांचवस्त्रालंकारभूषणां॥पयो
कदक्षिणोपितांब्राह्मणायकूटविने॥२७॥सदाचारायशुद्धायदरिद्रायोपकारिणे॥गांदत्वा
फलमाप्नोतिस्नानमात्रेणतत्फलं॥२८॥यावत्सदातिमनुजाःस्नानेनसद्गगति॥कृत्वानिदि
वितावंतिगोविंदगोपिकासरे॥२९॥स्नानेनसद्गवंतिगीतवादित्रनिःस्वनैः॥स्तुवंतोविवि ३५
धैःस्तोत्रैःगोविंदगोपिकासरे॥३०॥नमाउजेनेतेपांयातनानवतीदृणां॥सर्वान्कामानवा

प्नोतिवैसर्वंलोकमाक्रमात्॥३१॥अर्घंदत्वाविधानेनस्नानंकुर्याद्विचक्षणः॥मंत्राणानेन 67/1964
वैसाध्यःअघमापरमाप्नुतः॥३२॥अर्घंदद्याद्विधानेनमृदमाजलपाणिना॥गोप्रचारज
गन्नाथगृहाणार्घनमोस्तुते॥३३॥स्नात्वातुश्रद्धासमायुक्तोतर्पयेलिष्टदेवता॥३४॥श्रा
द्धंकुर्यात्ततोभक्त्यात्वेकचित्तःसमाहितः॥पयोक्तांदक्षिणांदद्यात्रजतंरुक्ममेवच॥३५॥
विशेषतःप्रदातव्यंतांबूलंकजलंतथा॥दुकूलानिचदेयानितथाकौसुंभकानिच॥३६॥
दंपत्योर्वासिसीचैवभूषणानिस्वशक्तितः॥गांश्चदेयाद्विजातिभ्योवृषभाश्चधुरंधरः॥३७॥
दीनांधकृपणानांचदानंदेयंस्वशक्तितः॥एवंस्नात्वानरःसम्यकुउत्तमांगतिमाक्रयात्॥३९॥
यंयंकामयतेकामंस्वर्गमोक्षादिकंनरः॥तत्सर्वंसमवाप्नोतियःस्नातोगोपिकासरे॥४०॥याव
ल्लोकेभविष्यंतितावत्स्थास्यतिवैसरः॥यावत्सरस्ततःकीर्तिर्भवितीनांभविष्यति॥४१॥यावत्की

त्रिर्मनुष्यैःश्रुतावस्वर्गतिसंश्रयः॥ विमुक्तपापाःसकलायास्यंति परमांगतिं॥४२॥ श्रुत्वैवं
गोपीसरमिदंजलस्पृश्यमिदैवहि॥ अवगाह्य मयागोप्यो नजस्यनियमेनहि॥४३॥ नवंत्स
:पतिभावेन ब्रह्मभावेनवाप्नुनः॥ चिंतयंत्यः परमांहि परांगतिमवाप्स्यथ॥४४॥ श्रीप्रल्हा
दउ॥ अनुज्ञातास्तभगवता ततस्तागोपकन्यकाः॥ नमस्कृत्य चगोविंदं ययुःसर्वायथाग
तं॥४५॥ भगवानपिगोविंदः उद्धवेन समन्वितः विसृज्यगोपिकाः सर्वाःस्वधामह्यजितोयप्र
यौ॥४६॥ इतिश्रीप्रल्हादोक्तसंहितायां द्वारकामाहात्म्ये गोप्रचारमाहात्म्यंनामत्रयोदशो
ऽध्यायः॥ ॥१३॥ ॥श्रीप्रल्हादउ॥ संत्यनेकानितीर्थानि वक्तुमस्याश्चितानिवा॥ प्राप्तेकलि
युगेघोरेतानिसुप्तावसागरः॥१॥ उद्देशतोमयाविप्राः कीर्त्यमानानिशृण्वथ॥ संक्षेपतो ३६
विप्रवरायथातेषांचयत्क्रिया॥२॥ संहृत्यचतुर्बोनारंसाधून्संस्थाप्यसत्पथे॥ द्वारवत्याम

गात्कृष्णोहर्षिसंसाध्यचात्मनाधैःसमाहितः॥३॥ दर्शनार्थंतदाब्रह्मादेवतैःपरिवारितः॥
वरुणेंद्रयमविघ्नेशोसूर्यचंद्रमसैस्तथा॥४॥ संगत्यसहृष्णेनकार्यंसंसाध्यचात्मनः॥ वेक्ष
श्चक्रेततस्तीर्थंस्वनाम्नाकीर्तितंभुवि॥५॥ ब्रह्मकुंडमितिख्यातंसर्वपापप्रणाशनं॥ तत्तीरे
स्थापयामाससहस्रकिरणंप्रभुं॥६॥ मूलंसुराणांहिकिल ब्रह्मालोकपितामहः॥ तेनसं
स्थापितोयस्मात्मूलस्थानमितिस्मृतः॥७॥ ब्रह्मतीर्थंततोदृष्ट्वाचंद्रश्चक्रेततःसरः॥ तडागं
चंद्रनाम्नावैसर्वपापप्रणाशनं॥८॥ तंदृष्ट्वातेजसायुक्तंसंहृष्टःसुरसत्तमः॥ ऊचुस्तेलोकस्र
ष्टारंशृणुध्वंवचनंहिनः॥९॥ योत्रस्नानंप्रकुरुतेपितॄन्संतर्प्यपिष्यति॥ पूजयित्वातुदेवे
शंमूलस्थानंसुरर्षभं॥१०॥ सर्वपापविनिर्मुक्तोधनधान्यसमन्वितः॥ सप्तम्यांमाघमाघसस्य
शुक्लपक्षेद्विजर्षभाः॥११॥ यात्रास्नानंप्रकुरुतेमानवोभक्तिसंयुतः॥ मूलस्थानंचदेवेश

69
1964

संस्नाप्य च विलिप्यं च ॥१२॥ पूजयिष्यति वस्त्राद्यैः स्वशक्त्या भूषणैस्तथा ॥ पुष्पधूपादिभिर्दीपै
र्नैवेद्येन च मानवो ॥१३॥ सर्वान्कामानवाप्नोति ब्रह्मलोकं च गच्छति ॥ सावित्रीं च ततो दृष्ट्वा ब्रह्म
णा स्थापितं रवि ॥१४॥ स्नात्वा चायतनं पुण्यं पश्चान्मूर्त्तिमं निवेशयच ॥ नाम चक्रे विधिस्तस्याः स्वयं दे
व्याः पितामहः ॥१५॥ तां पश्यति विधिं भक्त्या तत्क्षणं दृष्ट्वा जगत्पतिं ॥ सर्वान्कामानवाप्नोति सु
खी भवति सर्वदा ॥१६॥ आयुरारोग्यमैश्वर्यं पुत्रसंतानमेव च ॥ न दौर्भाग्यं भवेत्तस्य दारिद्र्यं
न च मूर्षता ॥१७॥ न च व्याधिभयं तस्य यः पश्यति विधिं नरः ॥ गत्वा संस्नापयेद्देवीं कुंकुमेन
कुंकुमकैः ॥१८॥ संछाद्य वस्त्रैः संपूज्य पुष्पैर्नानाविधैस्तथा ॥ नैवेद्य फल तांबूल ग्रीवासूत्रकदी
पकैः ॥१९॥ विधिर्दृष्टो मनुष्यैर्यैः कुले तस्मिन्न जायते ॥ तस्मात्सर्वात्मना विप्रो विधिं पश्य सुभा ३७
वतः ॥२०॥ संपूज्य स्नापयेद्देवीं यात्रा च सफला भवेत् ॥ न वैधव्यं न दौर्भाग्यं न वंध्या न मृतप्र

71/1964

जाः ॥२१॥ यदि तुष्टो भवेच्छ्रेष्ठो यात्रा च सफला भवेत् ॥ श्रीप्रह्लाद उ ॥ ब्रह्मणा स्थापितं दृष्ट्वा ब्र
ह्मण्यायतनं तदा ॥२२॥ इंद्रश्चक्रे महाभाग मरुः परमशोभनं ॥ स्थापयामास देवेशं लिंग
मप्रतिमौजसं ॥२३॥ तत्र स्नात्वा चलभते पश्चादिंद्रपदं नरः ॥ तस्मादिंद्रपदं नाम सुप्रसि
द्धं धरातले ॥२५॥ इंद्रेण स्थापितं लिंगं यस्माज्ञावनयासद ॥ प्रसिद्धमिंद्रनाम्ना वै इंद्रेश्वर
मिति स्मृतं ॥२६॥ यस्य प्रसिद्धिरतुला दृष्टिर्लिंगमिति द्विजाः ॥ यस्य दर्शनमात्रेण मुच्यते स
र्वपातकैः ॥२७॥ पितॄणामक्षया तृप्तिर्जायते द्विजसत्तमाः ॥ अष्टम्यां च चतुर्दश्यां स्नात्वा चें
द्रपदे नरः ॥२८॥ इंद्रेश्वरं च संपूज्य याति मुक्तिपदं नरः ॥ विशेषतः स संपूज्यो मकरस्थे दिवा
करे ॥२९॥ उत्तरायनसंक्रांतौ लिंगपूरणकेन दि ॥ शिवरात्र्यां विशेषेण संपूज्यं सोमपासद ॥
३०॥ रात्रौ जागरणं कुर्यात्परं मंलोकमाक्रपात् ॥ प्रह्लाद ॥ ब्रह्मतीर्थे तु संदृष्ट्वा तथा शक्रसरं न

वं॥३१॥ दृष्ट्वापि न विष्णुना सार्द्धमेकरूपत्वमात्मनः॥ सरश्चकार देवेशो भगवान्पार्वतीपति
॥३२॥ सुस्पष्टनिर्मलजलं नलिनीदलशोभितं॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितं॥३
३॥ उत्पलैः सर्वतश्छन्नं सरः सारसशोभितं॥ तदगाधजलं दृष्ट्वा स्वयमेव पिनाकधृक्॥३४
॥ सब्रह्मविष्णुना सार्द्धं स्नातस्तत्र वृषध्वजः॥ ते देवास्तत्सरो दृष्ट्वा ब्रह्मविष्णुमुखाः सुराः॥३५॥
ऊचुः सर्वे सुसंहृष्टा वीक्षंतः पार्वतीपतिं॥ यस्मात्कृतमिदं विश्वाधीश्वरेण महत्सरः॥३६॥ म
हादेवसरो नाम सुप्रसिद्धं भविष्यति॥ योत्र स्नानं प्रकुरुते पितॄणां तर्पणं तथा॥३७॥ श्राद्धं पि
तॄणां न कुर्याच्च स गच्छेत्परमां गतिं॥ सुप्रसन्ना भविष्यंति सर्वदेवा न संशयः॥३८॥ दर्शनात्पापनिर्मु
क्तो महादेवसरस्य च॥ महेशस्य च तं दृष्ट्वा सरः परमशोभनं॥३९॥ चकार पार्वती तत्र सरश्चाप ३८
तिमा तथा॥ गौरीसरश्च विख्यातं सर्वपापप्रणाशनं॥४०॥ तत्र स्नात्वा नरो भक्त्या न दुर्गतिमवा-

प्नुयात्॥ नदीभागीपंस्त्रियोयतिनाप्रजलंकदाचन॥४१॥ स्नात्वा गौरीसरे रम्ये सर्वान्कामा
नवाप्नुयात्॥ वरुणश्च ततो दृष्ट्वा पुण्यान्यायतनानि वै॥४२॥ चकार सुरसो दिव्यं विष्णुभ
क्तिपुरस्कृतः॥ नाम्नाकं वरुणपदं तत्र पापक्षयकरं भुवि॥४३॥ तत्र स्नात्वा पूर्णिमास्यां यांसं
तर्प्य पितृदेवताः॥ श्राद्धं कृत्वा विधानेन पितॄणां श्रद्धयान्वितः॥४४॥ वरुणस्य लोकमाप्नोति
सर्वगात्मा न शोचति॥ प्रदद्यादुदकुंभांश्च दध्योदनसमन्वितान्॥४५॥ गावो वस्त्राणि रत्नानि वि
ष्णुर्मे प्रीयतामिति॥ सरो दृष्ट्वा जलेशस्य सरश्चक्रे धनाधिप॥४६॥ पद्माक्षिपसरो नाम सुप्र-
सिद्धं धरातले॥ तत्र स्नात्वा नरो भक्त्या संपूज्य पितृदेवताः॥४७॥ सर्वान्कामानवाप्नोति द
द्याद्वस्त्रं द्विजातये॥ प्रह्लादश्च॥ विष्णुवरप्रदं कृत्वा स्तोत्राणां ब्रह्मनंदनः॥ मंदाकिनी वसिष्ठे
च सम्मानीता धरातले॥४८॥ आसुरी व्यादपाः सर्वे आजग्मुः सप्तपालितां॥ तीरे तस्याश्च ते दृष्ट्वा-

73/1964

गोमतीसागरंगमां॥५०॥तीर्थानिदेवतानांचपुण्यायतनानिच॥तीर्थंपंचनदंचक्रुःप्र
ज्ञानांपतयस्तदा॥५१॥पंचनद्यःसमाहूतास्तत्राजग्मुःसुरार्च्चिताः॥५२॥मरीचयेगोमतीचल
क्ष्मणात्रिजेतथा॥चंद्रभागामंगिरसेपुलहायकुशावति॥५२॥पावनार्थंजांबुवतीभा
गामकंतवेतदा॥तासुस्नातामहाभागाब्रह्मपुत्रायशस्विनः॥५३॥नामतस्यतदाचक्रुःपं
चनद्येतितापसाः॥तस्मात्पंचनदंतीर्थंसर्वपापप्रणाशनं॥५४॥स्नातव्यंतत्रमनुजैःस्व
र्गमोक्षार्थिभिःसदा॥तत्रगत्वामुनियतःगृहीत्वार्घंफलेनहि॥५५॥मंत्रेणानेनवैविप्राःद
द्यादर्घंविधानतः॥ब्रह्मपुत्रैःसमानीताःपंचैताःसरितांवराः॥५६॥गृह्णंत्वर्घमिमंदेव्यःस
र्वपापप्रशांतये॥स्नात्वास्नानंकृत्वाततोदेवान्पितृन्संतर्प्पयेन्नरः॥५७॥श्राद्धंकृत्वाविध ३९
नेनश्रद्धयापरयायुतः॥पंचरत्नंततोदेयंसप्तधान्यंद्विजातये॥५८॥दीनांधकृपणानांच

देयंदानंस्वशक्तितः॥सर्वान्कामानवाप्नोतिब्रह्मलोकंचगच्छति॥५९॥पुत्रपौत्रसमायुक्तो
परंसौख्यमवाप्नुयात्॥प्रेतयोनिंगतायेचयेचकीटत्वमागताः॥६०॥तेसर्वेतृप्तिमायां
तिपितरस्त्रिकुलोद्भवाः॥इतिश्रीस्कांदोक्तसंहितायांश्रीद्वारकामाहात्म्येपंचनद्यमाहात्म्यं
नामचतुर्दशोऽध्यायः॥ ॥श्रीस्कंद उ॥श्रुत्वातमागतंदेवंब्रह्माणंपितरंस्वकं॥सनकाद्या
नमश्चक्रुर्जग्मुःसर्वेपितामहं॥१॥तंदृष्ट्वालोकस्रष्टारंदंडवत्प्रणताक्षितौ॥चिरान्दृष्ट्वास्वत
नयान्संहृष्टःपरिषस्वजे॥२॥पृष्टश्चानामयंतैस्तुदृष्ट्वातान्समुवाचह॥आराधितोयैर्भग
वान्ध्यानाद्यैःसंशयंतथा॥३॥संसिद्धंपरमंयातान्भगवान्दर्शनेनहि॥तज्ज्ञातंपुत्रकाःसर्व्वे
म्यक्ज्ञानाबालकबुद्धिनः॥४॥येनार्च्चितोमहादेवस्तस्यतुष्यतिकेशवः॥अर्चितेनीलकंठे
नतुष्टांचगच्छतेहरिः॥५॥तस्मात्सर्वप्रयत्नेनपूज्यतांनीललोहितः॥येनसंपूजितायातिप्रज्ञा

75/1962

विष्णुमयाऽस्तता॥१६॥ तत्तु श्रुत्वा वचनं तस्य ब्रह्मपुत्रा ययुस्तदा॥ देवं गोष्ठे तु ते गत्वा योगसि
द्धा महर्षयः॥१७॥ लिंगं संस्थापयामासुः शिवभक्तिपुरस्कृताः॥ संस्थाप्य शिवलिंगं ते स्नाना
र्थं मुनिसत्तमाः॥१८॥ कूपं चक्रुस्ततः सर्वे ऋषयः शंसितव्रताः॥ दृष्ट्वा तदमृतप्रख्यं जलपू
र्णं मुनिर्मलं॥१९॥ संहृष्टा ऋषयः सर्वे साधु साध्विति चाब्रुवन्॥ स्थापितं शिवलिंगं तु दृष्ट्वा लो
कपितामहः॥२०॥ उवाच वचनं ब्रह्मा प्रीतः पुत्रान्हि पद्मजः॥ भवद्भिर्योगसंसिद्धैर्यस्मादत्र
स्थापितः शिवः॥२१॥ तस्मात्सिद्धेश्वर इति नाम चास्य भविष्यति॥ समीपे शितिकंठस्य कूपो
य ऋषिभिः कृतः॥२२॥ ऋषितीर्थमिति ख्यातं तस्माल्लोके भविष्यति॥ विनाश्राद्धेन विप्रेंद्रा दा
नेन पितृतर्पणात्॥२३॥ भक्तितः स्नानमात्रेण ब्रह्मलोकमवाप्नुयात्॥ असत्यवादिनो ये च ४०
परनिंदापरायणाः॥२४॥ स्नानमात्रेण शुध्यंति ऋषितीर्थे न संशयः॥ वाचिकं मानसं चैव

कर्मणा समुपार्जितं॥२५॥ तथाऽक्षयुगाद्यां हि माघस्य द्विजसत्तमाः॥ शिवरात्र्यां वसंयस्तु
लिंगे सिद्धेशसंज्ञिके॥२६॥ स्नातस्य ऋषितीर्थे तु नरपतेन्नात्र संशयः॥ स्नानं प्रशस्तं सर्वासु
मन्वादिषु तथैव च॥२७॥ स्नात्वा तीर्थे ऋषिस्नते किं तस्यान्यैव वै द्विजाः॥ गत्वा तत्र महाभागा
॥ गृहीत्वा फलमुत्तमं॥२८॥ अर्घं दद्याद्विधानेन तत्त्वाव करमोः कृशानु॥ अर्घं लिघमिमं वि
प्रा योगसिद्धा महर्षयः॥२९॥ ऋषितीर्थे च पापघ्ने सिद्धेश्वरसमीपतः॥ दत्वार्घं हृदमालस्य स्ना
नं कुर्याद्यथाविधि॥३०॥ तर्पयेच्च पितृन्देवान्मनुष्यांश्च यथाक्रमं॥ ततः श्राद्धं प्रकुर्वीत पि
तॄणां श्रद्धयान्वितः॥३१॥ दद्याच्च दक्षिणां तत्र वित्तशाठ्यविवर्जितः॥ विशेषतः प्रदातव्यं फला
नि रसवंति च॥३२॥ देयौ श्यामाकनीवारौ विद्रुमं वाजिनानि च॥ शालयः सप्रभक्ष्यं च सक्त
वो गुडसंयुताः॥३३॥ गंधमाल्यानि तांबूलं वस्त्राणि च तथा पयः॥ एवं कृत्वा समग्रं च ततस्तो

77/1962

भवेन्नरः॥२४॥ पूजयित्वा महादेवं सिद्धेश्वरमुमापतिं॥ सफलं जन्म मर्त्यस्य जीवितं च सुजीवि
तं॥२५॥ यः स्नात्वा ऋषितीर्थेषु पश्येत्सिद्धेश्वरं शिवं॥ अपुत्राः पुत्रिणस्सुते पुत्रिणस्यापि पौत्रि
णः॥२६॥ निर्धनो धनवांस्तस्य सिद्धेश्वरनतो नरः॥ दुष्कृतं याति विलयं सुकृतं च विवर्द्धते॥२७॥
भवेन्मनोरथावाप्तिः स्मरणात्सिद्धनायकं॥ पितरस्तस्य हृष्यंति हृष्यंति च पितामहाः॥२८॥ ऋषि
तीर्थे नरः स्नात्वा स्नात्वा सिद्धेशपूजनं॥ शिवरात्र्यां विशेषेण पूजनीयो महात्मभिः॥२९॥ यं यं
कामयते कामं तं तं ददाति न संशयः॥ चिंतामणिसमः स्वामी अथवा चाक्षयो निधिः॥३०॥ ऋषि
तीर्थे नरैर्यैस्तु दृष्टः सिद्धेश्वरः प्रभुः॥३१॥ इति श्रीस्कांदोक्तसंहितायां द्वारकामाहात्म्ये सिद्धेश्व
रमाहात्म्यं नाम पंचदशोऽध्यायः॥ ॥श्रीस्कंद उ०॥ ततो गच्छेद्द्विप्रेंद्राः गदातीर्थमनुत्तमं॥ यत्र ४१
स्नात्वा नरः सम्यगग्निष्टोमफलं लभेत्॥१॥ नमस्कुर्याद्द्विदेवेशं विष्णुं वाराहरूपिणं॥ तं दृष्ट्वा प

79
1964

रया भक्त्या विष्णुलोके महीयते॥२॥ नागतीर्थं ततो गच्छेत्सरः परमशोभनं॥ यत्र स्नात्वा नरः
सम्यक् नागलोके महीयते॥३॥ विश्रामनंतरं ततो गच्छेत्तीर्थं त्रिभुवनाश्रितं॥ स्नानमात्रेण लभ
ते लिङ्गधेनुफलं नरः॥४॥ यदा द्वारवती विप्राः प्लाविता सागरेण हि॥ पुण्यानि दशरूपाणि कृति
चिह्नं तिस्थद्रूपाण्यल्पराणि च॥ तानि सर्वाणि विप्रेंद्राः कथयामि समासतः॥५॥ चंद्रभागां त
तो गच्छेत्सर्वपापप्रणाशिनीं॥ तत्र स्नात्वा नरो भक्त्या वाजिमेधफलं लभेत्॥७॥ देवी चंडा चि
तां यत्र पश्यो दानंदिनी॥ कुमारिकां शक्तिहस्तां खड्गखेटकधारिणीं॥८॥ कंसादिदैत्यदम
नीं स्वसारं रामकृष्णयोः॥ यस्या दर्शनमात्रेण सर्वान्कामानवाप्नुयात्॥९॥ ततो गच्छेद्द्विजेंद्रा
तीर्थं माहिषसंज्ञकं॥ यस्य दर्शनमात्रेण मुच्यते सर्वपातकैः॥१०॥ मुक्तिद्वारं ततो गच्छेत्तीर्थं
पापप्रनाशनं॥ वसिष्ठेन समानीता मुनिना यत्र गोमती॥११॥ स्नातो भवति गंगायां तत्र

स्नात्वा कलौ युगे॥ गोमती निसृता यस्मात्पूर्वविष्टा वरुणालयं॥१२॥ तत्र स्नात्वा नरो भक्त्या
अश्वमेधफलं लभेत्॥ भृगुणाहितपत्नी संस्थापिता यत्र चांबिका॥१३॥ भृगवर्चिता ततो दे
वी यत्र सिद्धा स्वयं ते स्थितौ॥ संसद्धिं परमां यांति यस्य संस्मरणेन च॥१४॥ विविधलिंगा स्वयंभुका
नि यत्र संति महीतले॥ ततो गच्छे द्विजेंद्राः कालिंदीपुरसंगमं॥१५॥ कालिंदी सूर्यतनया स
रश्चक्रे स्वनुत्तमं॥ तत्र स्नात्वा नरो भक्त्या सद्गतिमवाप्नुयात्॥१६॥ सांबतीर्थं ततो गच्छे
त्तीर्थं त्रैलोक्यविश्रुतं॥ स्नात्वा श्राद्धं च विधिवल्लभेत्कोटिदानजं फलं॥१७॥ शंकरं च ततो गच्छे
त्सर्वपापप्रणाशनं॥ यत्र स्नात्वा नरो भक्त्या लभेद्दकुसुवर्णकं॥१८॥ ततो नागसरो गच्छे
त्तीर्थं पापप्रणाशनं॥ पितॄन्संतर्प्य विधिवन्नागलोकमवाप्नुयात्॥१९॥ लक्ष्मीनदीं ततो ४२
गच्छेत गच्छंती सागरं प्रति॥ यस्मादर्शनमात्रेण मुच्यते सर्वपातकैः॥२०॥ आदे स्नात्वा विधिं

ना: पितृणां मुक्तिमावहेत्॥ दाने मनोरथावाप्तिर्भवेन्नात्र संशयः॥२१॥ कबूसरस्ततो ग
च्छेत्तीर्थं पापप्रणाशनं॥ तर्पणे च कृते श्राद्धे अग्निष्टोमफलं लभेत्॥२२॥ कुशातीर्थं ततो गच्छे
स्नात्वा संतर्पयेत्पितॄन्॥ दानं दत्वा यथाशक्त्या निर्मलं लोकमाप्नुयात्॥२३॥ प्रद्युम्नती
र्थं तत्रैव सर्वपापप्रणाशनं॥ स्नात्वा श्राद्धं च तत्रैव वाजपेयफलं लभेत्॥२४॥ वज्रतीर्थं त
तो गच्छेत्स्वद्यापरयायुत॥ स्नात्वा श्राद्धं पितृणां दिवास्त यं लोकमाप्नुयात्॥२५॥ दुर्वासमा
यत्राश्रमकोपाद्यदुकुमारकाः॥ तत्र जालेश्वरो देवः संभवत्युमापतिः॥२६॥ जालेश्वरं ततो
दृष्ट्वा सद्यः पापात्प्रमुच्यते॥ संपूजयित्वा भक्त्या च शिवलोकमवाप्नुयात्॥२७॥ चक्रस्वामि
सुसंतीर्थं ततो गच्छेद्यमानवः॥ स्नात्वा श्राद्धं पितॄंस्तर्प्य विष्णुलोकमवाप्नुयात्॥२८॥ जरत्कार
स्ततं तत्र तीर्थं त्रैलोक्यविश्रुतं॥ स्नात्वा तत्र द्विजश्रेष्ठा सद्गतिमवाप्नुयात्॥२९॥ आसीत्तं

जनकोनामदैत्यश्चापिबलान्वितः॥ ततःखंजनकंतीर्थंतस्यनाम्नाचविश्रुतं॥३०॥ तत्रस्नात्वा
नरोयातिसोमलोकंनसंशयः॥ संतितीर्थान्यनेकानिस्तुगुप्तानिकलौयुगे॥३१॥ नानिगछंत्
विप्रेंद्राद्राक्तीर्थमानकदुंदुभेः॥ स्मरतीर्थंपरमकंगदातीर्थमतःपरं॥३२॥ शालवाख्यस्य
तीर्थंत्वक्रूरस्यमहात्मनः॥ बलदेवस्यतीर्थंचउग्रसेनस्यचापरं॥३३॥ उद्धवस्यचतीर्थं॥
अर्जुनस्यचतीर्थंसारंगाख्यंतथैवच॥ सत्यनामात्मनंतीर्थमतःपरं॥३४॥ जामदग्न्यस्यतीर्थं
चरामस्यचमहात्मनः॥ व्यासतीर्थंचतत्रैववसुकतीर्थमतःपरं॥३५॥ कर्दमस्यचतीर्थंचकपि
लस्यमहात्मनः॥ सोमतीर्थंचतत्रैवरोहिणीतीर्थमेवच॥३६॥ हरिदासस्यतीर्थंजयवंताख्य
विश्रुतं॥ एतान्यन्यानिसंक्षेपात्मयावकथितानिच॥३७॥ सर्वपापहराणीहमोक्षदानिन ४३
संशयः॥ प्रच्छन्नानिद्विजश्रेष्ठास्तीर्थानिकलिसंक्रमे॥३८॥ ज्ञापितानिसमुद्रेणपांडुनाःपुर

केनच॥ एतन्मयावःकथितंसंक्षेपात्तीर्थविस्तरं॥३९॥ आत्मप्रज्ञानुमानेनकिमन्यत्श्रोतु 83 1962
मिछथा॥ शृणुयात्सरयास्नात्वातीर्थयात्रामिमांद्विजः॥४०॥ सर्वपापविनिर्मुक्तोविष्णुलोकंव्र
जंतिते॥४१॥ इतिश्रीप्रल्हादोक्तसंहितायांद्वारकामाहात्म्येतीर्थयात्राकथनंनामषोडशो
ऽध्यायः॥ ॥७॥ ऋषयऊचुः॥ पूजांविधिंचलक्षस्ययथावद्दैत्यसत्तम॥ कथयस्वमहाभाग
त्वानुपूर्व्यासमासतः॥१॥ द्वारपालश्चकःस्तत्रपूजकःपूर्वःप्रपूजकः॥ पुरीसर्वतोदैत्यतिष्ठते
केनपालिता॥२॥ कथयस्वविधिज्ञोसिलक्षैकचरणप्रियः॥ श्रीप्रल्हादउ॥ स्नात्वाभिषेकतीर्थेचय
थावत्तनदक्षिणां॥३॥ पूजयेत्ततोदेवंलक्षाख्यंपुरुषंपरं॥ श्रूयतांपूजनंविप्राःआनुपूर्व्याद्वि
धानतः॥४॥ कलौलक्षस्यदेवस्यभुक्तिमुक्तिप्रदस्यच॥ शृणुयात्स्वर्गमाप्नोतिपूजनान्मोक्षमेवच
॥५॥ पूर्वद्वारस्थितान्देवान्शृणुध्वंसुसमाहिता॥ जयंतःजयमंपूज्यःपूलोमसप्तप्तामुत॥६॥ स्वा

पितोदेवराजेनकंसेवार्थंकिशवस्यच॥संपतोरक्षितिर्यैस्तुमान्तिबोधद्विजोत्तमाः॥७॥वज्रना
नःसुनानस्यवज्रबाहुर्महाहनुः॥वज्रदंष्ट्रोवज्रधारीवज्रहावज्रलोचनः॥८॥स्वेतमूर्द्धिस्वेतमा
लाजीमूतानुचराश्चये।एतेशस्त्रोद्यतकरारक्षंत्येवमहर्निशं॥९॥पूर्वद्वारेतुसंन्नद्धाजयंता
देशकारिणः॥पूर्वद्वारेश्वरक्षार्थंनरनाथोविनायकः॥१०॥तरुणार्कश्चवैसूर्योदिव्योवैसप्तमा
नरः॥ईश्वरश्चापिदिग्वासानागराजश्चनक्षकः॥११॥सेनानीकार्त्तिकेयश्चराक्षसश्चमहामुख
॥तत्रदीर्घनखोनामदानवःसुप्रतिष्ठितः॥१२॥विश्वावसुश्चगंधर्वोमेनकाचवराप्सराः॥सनत्कु
मारसहितोवसिष्ठोनगवान्दषिः॥१३॥एतेप्रजाःपूर्वतस्तुन्यग्रोधश्चमहाद्रुमः॥पूर्वद्वारस्थिताभे
तानाग्नेय्यामथतेशृणु॥१४॥ज्वालामुखोथरक्षाहःश्मशानोनिलयःस्मृशः॥मांसाहोरुधिराहा ४४
रः॥लम्बःलम्बजटाधरः॥१५॥त्रासनोऽशंतनश्चैवआग्नेय्यांदिशिसंस्थिताः॥दिशंरक्षंतिसंनद्धाद

क्षिणामथतेशृणु॥१६॥दंडपाणिर्महानादपाशहस्तोग्रलोचनः॥अतिवर्त्तकोमारणश्चतथा 85/1964
डुंडुभिनिःस्वनः॥१७॥खरस्वरोघुर्घुरवःतथामीनप्रियःसदा॥मल्लिकाक्षश्चएतेषांप्रणताद्वा
रपालकः॥१८॥दक्षिणद्वाररक्षार्थंढुंढिश्चविनायकः॥महिषार्कश्चवैसूर्योभूषणश्चतथे
श्वरः॥१९॥चंडिकावनथादेवीऊर्ध्वबाहुश्चराक्षसः॥पद्माक्षःक्षेत्रपालश्चनागश्चाश्वतरस्त
था॥२०॥चित्रांगदश्चगंधर्वोचित्रशीर्षवराप्सराः॥गोरजोदानवश्चैवशालश्चापिमहाद्रुमः॥२१॥
सनातनऋषिश्रेष्ठोत्वगास्त्यमहातपाः॥एतेयाम्यदिशाद्वारंरक्षंतिसुसमाहिताः॥२२॥गीतस्त
र्तकोनमःकंबलीरोदनप्रियः॥हसनोनेत्रनंगश्चश्चन्तूविकारोविझंनकः॥२३॥सुमृशालीमूषिकस्ते
षांदेतादृशामथाप्रजु॥रक्षंतिनैऋतामाशांपश्चिमांशृणुतापरान्॥२४॥स्वस्तिकःशंखमूर्द्धवि
नीलवासाश्चनातनः॥पाशहस्तएकपादैकलोचनः॥२५॥स्थूलजंघस्थूलशिराःसुमुखश्चवशोस्थि

त:॥ एते शस्त्रोद्यतकरा वारुण्यां दिशि पालकाः॥२६॥ पश्चिमायां दिशि तथा पुष्पदंतो विना
यकः॥ उद्दवार्कश्च वैमल्यः शिवा मत्राजितेश्वरः॥२७॥ तुंबरुर्नाम गंधर्वो घृताची च वराप्सराः
॥ महोदरश्च नागेंद्रो राक्षसश्च घटोत्कचः॥२८॥ दैत्यः पंचजनो नाम ऋषिः कश्यप एव च॥ दे
वी कपालिनी नाम अश्वत्थश्च महाद्रुमः॥२९॥ कपिलः क्षेत्रपालश्च प्रतीचीं पालयन् दिशां॥ न
मस्कार्यस्तथा पूज्यो वायव्यां स्मृयतां दिशि॥३०॥ मंजनो भैरवश्चैव कालिकेयघटोदरः कंटकोमर
र्दनः पिंगो रुरुः सर्वजुजो घृणी॥३१॥ सुपार्श्वश्च गुरेतेषां मंत्रदाः पालयन् दिशां॥ उदीचीं दि
शि विप्रेंद्राः श्यामलश्च गणाधिपः॥३२॥ सत्वंतको विरूपश्च गोलकः स्वेदसंस्कृतः॥ कुक्कुब
श्च जंबुको यपराजितेः॥३३॥ उन्मत्तः प्रभुरेतेषामुदीचीं पालयन् दिशि॥ मूलस्थानश्च वैसूर् ४५
यो इंद्रेश्वरसदेश्वरः॥३४॥ देवी कंवेश्वरी नाम क्षेत्रपालश्च खंजनः॥ वासुकिर्नागराजश्च रु

मिष्टश्च दानवः॥३५॥ सकश्च ऋषिश्रेष्ठो गोलको राक्षसस्तथा॥ नारदो नाम गंधर्वो रंभा चैव व
राप्सरा॥३६॥ एते पूज्याः प्रयत्नेन प्लक्षो नाम महाद्रुमः॥ यक्षेशसे विनामाख्यामेते पूज्याः प्रयत्नत
ः॥३७॥ ईशान्यां दिशि विप्रेंद्राः किंकिणीको महाबलः॥ डमुखो भैरवरवोढुमुखो मेघनिःस्वन
ः॥३८॥ करालो क्कि विकचो मूको बलिभुक्च बलिप्रियः॥ मांसप्रियमुखाश्चैव ईशान्यां पालयन्
दिशां॥३९॥ एतेषां क्षेत्रपालानां दिशेश्वराणां द्विजोत्तमाः नेता प्रभुश्च स्वामी जयंतः पालकस्त
था॥४०॥ निगृह्णात्यनुगृह्णाति रक्षिता पुरवासिनां॥ जयंत दिशिमादाय विद्धष्टं घातयंति वा॥
॥४१॥ नागस्थलस्थितो स्वामी जयंतः पालसदा॥ नागराजैः परिवृतः पूजनीयः प्रयत्नतः॥४२॥ स
हस्रशारसंतत्र शेषनागस्थ स्थितं॥ अनंतो वासुकिश्चैव तक्षकः पद्म एव च॥४३॥ शंखः कंबल
कश्चैव नागश्चाश्वतरस्तथा॥ कर्कोटकमुखा नागा तेवसंति संतिसंहस्रशः॥४४॥ ते पूज्या गंध

87/1962

पुष्पैश्च बलिभिः पुष्पमंचयैः॥ पायसेनच मांसेन लंबनाद्यैः सुरया तथा॥४५॥ ततः संस्थाप्य देवे
शं जपंतं रक्षणां वरं॥ गंधपुष्पोपहारैश्च धूपवस्त्रादिभूषणैः॥४६॥ ततो गत्वा द्विजश्रेष्ठाः ऽग्रं
देवकिनंदनं॥ संपूज्य प्रथमं तत्र गणेशो रुक्मिसंज्ञिक॥४७॥ ऋषय ऊ॥ कथं रुक्मी दैत्येंद्र
पोडुपो दुष्टो गणतां गतः॥ साक्षाद्भगवतो वारि भ्रत्यस्त्रः पूज्यते नरैः॥४८॥ प्रह्लाद उ॥ अस्या
प रुक्मिणी दातुं पदाराजा भ्रतह्मण॥ तद्वेषात्क्रोधसंयुक्तो रुक्मी वैद्यममन्यत॥४९॥ यदा
जहार भगवान्रुक्मिणीं मंबिकालयात्॥ नाहत्वा विनिवर्त्तिष्यित महं यादवं रणे॥५०॥ एवमु
क्त्वा सुसंनद्धो युद्धायुद्धायपरिधाविता॥ सयुध्यमानः कृष्णेन भग्नमानो हतौजसः॥५१॥ रामेणामुं ४६
बंधनान्मुक्तो मरणाय मतिं दधे॥ रुक्मिणीभ्रातरं दृष्ट्वा मरणे कृतनिश्चयं॥५२॥ उवाच कृष्णं वै
दर्भी भ्रातरं ह्यानय स्वमे॥ ततस्तस्यि यकामार्थमनुमान्य जनार्द्दनः॥५३॥ चकार पार्षदां मध्ये

घवरं विघ्ननायकं॥ एतस्मात्कारणाद्विप्राः प्रथमं पूज्यते सदा॥५४॥ गंधवस्त्रक्षतैर्धूपैः मो
दकैः परितर्प्पयेत्॥५५॥ इति श्रीप्रह्लादोक्तसंहितायां द्वारकामाहात्म्ये यात्रायां परिवा
रकथनोनाम सप्तदशोध्यायः॥ ॥छ॥ ॥श्रीप्रह्लाद उ॥ संपूज्य गणनाथं तं रुक्मिणं रु
क्मिभूषणं॥ उवास मंच कृष्णं च बलदेवं च भक्तितः॥१॥ यजत्येको महायज्ञैः संपूर्णैर्वरदक्षि
णैः॥ एकः पश्यति देवेशौ कृष्णं तुल्यफलौ हितौ॥२॥ गोभूहिरण्यदानानि ददात्येको दिने दिने
॥ एकः पश्यति देवेशौ कृष्णं तुल्यफलौ हितौ॥३॥ प्राणायामादिसंयुक्तो ध्यानज्ञानपरायणः
॥ एक०॥४॥ जाह्नव्यादिषु तीर्थेषु स्नायात्येकः समाहितः॥ एक०॥५॥ कथं त्रिविक्रमो मूर्त्तिरागतेयं
धरातलात्॥ कलौ न्यासाश्च कृष्णं कदेव प्राप्तवानिति॥६॥ दैत्येंद्रापी रूपतडागानि करोत्ये
कः समाहितः॥ एक०॥७॥ त्रिभिः पदक्रमैर्येन विक्रांतं भुवनत्रयं। त्रिविक्रमं च तं दृष्ट्वा मुच्यते पात

89 / 10164

कश्यपात्॥७॥ऋषय ऊचुः॥ कथं त्रिविक्रमीमूर्त्तिरागतेयं धरातलात्॥ कस्मात्स्थानात्स्वरूपत्वं
कदेवप्राप्तवानिति॥८॥ दैत्येंद्र मंत्रयोस्माकं भेत्तुमर्हस्यशेषतः॥ दुर्वाससस्त्वत्तस्त्वस्त्वसंनवः
कथ्यतामिति॥९॥ प्रह्लाद उ०॥ तत्शृणुतां द्विजश्रेष्ठा यथामूर्त्तिस्त्रिविक्रमी॥ दुर्वाससा सम
युक्ता संप्राप्ता धरणीतलात्॥१०॥ पूर्वं त्रेतायुगे नैव बलिना च पुरंदरः॥ निर्जितो भ्रावितः स्था
नात्तत्तदर्थं मधुसूदनः॥११॥ कश्यपाद्वामनो जज्ञे ततो भूत्त्रिविक्रमः॥ त्रिभिः क्रमैरिमाँल्लो
कानाक्रम्य मधुहा हरिः॥१२॥ बलिं च कार भगवान् पातालतलवासिनं॥ भक्त्यातनस्य
याप्तद्वाः पूजया परितोषितः॥१३॥ स्वयं चैवावसत्तत्र भक्त्या क्रीतोपि केशवः॥ अनुग्रहा
य भगवान् द्वारपालो बभूव ह॥१४॥ दुर्वाससापि भगवान्नात्रेयो मुनिसत्तमः॥ अटंस्तीर्थानि ४७
मोक्षार्थी मुक्तिक्षेत्रमचिंतयत्॥१५॥ एवं संचिंतयंस्तस्य ज्ञानदृष्ट्या महामुनिः॥ गोम-

त्याः संगमे विप्राश्चक्रतीर्थं तु मुक्तिदं॥१६॥ एवं स निश्चयं कृत्वा गमनाय मतिं दधे॥ सोतीत्य
नगरग्रामानुद्यानानि वनानि च॥१७॥ आनर्त्तविषयं प्राप्तो दैत्यभूमिं विवेश ह॥ निःस्वा
ध्यायवषट्कारं वेदध्वनिविवर्जितं॥१८॥ कुशेन दैत्यराजेन सेवितां पालितां तथा॥ बहु-
म्लेच्छगणाकीर्णां धर्माचारपराङ्मुखां॥१९॥ प्रत्यासन्नमिति ज्ञात्वा चक्रतीर्थं तदा द्विजः॥ स्ना
त्वा च संगमे पुण्ये भो देहं तं सतांक्लिकः॥२०॥ इत्येवं चिंतयन्मार्गे शीघ्रमेव जगाम सः॥ गत्वा
तु संगमे पुण्ये गोमत्याः सागरस्य च॥२१॥ निक्षयवान्समीतत्र मृदमाहृत्य गोमयं॥ शिखां
बद्ध्वा च शिरसि कृत्वा च करयोः कुशान्॥२२॥ यदास्नात्स्यसि विप्रो सो दृष्टो दैत्यैर्दुरात्म-
भिः॥ ब्रुवंतः कोयमित्येवं हन्यतामिति॥२३॥ इति ब्रुवंतो हंतुं ते जानुभिर्मुष्टिभिः शिरैः॥
ब्राह्मणोहं न हंतव्य इत्युक्त्वा चाप्यताडयन्॥२४॥ तं दृष्ट्वा हन्यमानं तु ब्राह्मणं तैर्दुरात्मभि

॥निवारयामासवनान्तरूरुर्नाममहासुरः॥२५॥जगृहुस्तस्यवस्त्राणिकशाभिस्तेविह्वलिपुजौ
ले॥संक्रुद्धस्वरणौगृह्यशापंतोदुष्टचेतसः॥२७॥तदानिर्विषयांचक्रुःसीमांतेऋषिरेत
दा॥अत्रागतोयदिपुनःहनिष्यामोनसंशयः॥२८॥आनर्तविषयांतेवैदृष्ट्वातत्रजलाश
यं॥प्राणसंशयमापन्नःततःचिंतापरोभवत्॥२९॥शप्स्येहंयदिदैत्यैपास्त्रपसःविघ्नयेन
मे॥अथवानियमभ्रष्टंसंत्यक्ष्येयंकलेवरं॥३०॥ममसारांचकःकुर्यात्कोमेदास्यमितो
वितं॥चक्रतीर्थेचकःस्नानंकारयिष्यतिमामिह॥३१॥कोवादैत्यगणान्नेतान्कोशक्तोजे
तुंमहारणे॥तंविनापुंडरीकाक्षंभक्तानामभयप्रदं॥३२॥ब्रह्मादीनांजनेतारंशरणागत
वत्सलं॥चक्रहस्तंविनामेद्यकोन्यःशरणदोमम॥३३॥इतिध्यात्वाचसंचिंत्यज्ञात्वापाता
लसंस्थितं॥आत्रेयोविष्णुशरणंजगामधरणीतलं॥३४॥उपवासकृशोदीनोभूतलंप्र ४८

विवेशह॥सदैत्यराजस्तुवर्नगंधर्वाप्सरसावृतं॥३५॥शोभितंसुरसुख्येनविष्णुनाप्रभविष्णु ९३/१९८४
ना॥दुर्वासाप्रविवेशाथप्रहृष्टेनांतरात्मना॥३६॥दुर्वासमथायांतंदैत्यराजपतिस्तदा॥प्रत्यु
ज्जगामहर्षाच्चकृत्वासनेसंनिवेशयेत्॥३७॥मधुपर्कंचगांचैवदत्वाथंपार्श्वतःस्थितः॥प्रोवा
चप्रणतःप्रह्वःतत्रागमनकारणं॥३८॥सुखोपविष्टः॥सत्तपिस्तत्रापत्रपत्रिविक्रमं॥दैत्ये
द्रद्वारदेशोतिष्ठतिष्ठंतमकुतोभयं॥३९॥तंदृष्ट्वादेवदेवेशंश्रीवत्सांकंचतुर्भुजं॥रुदन्नृ
षिवरः॥सोथत्राहित्राहीत्यभाषत॥४०॥संसारभयभीतानांदुःखितानांजनार्दन॥शत्रुभि
:परिभूतानांशरणंशरणार्थिनां॥४१॥ममदुःखमितस्यशत्रुभिःकर्शितस्यच॥पराभू
तस्यदीनस्यक्षुधयापीडितस्यच॥४२॥अपूर्णनियमस्याथक्लिशितस्यचदातवैः॥ब्रह्मण्यदे
वविप्रस्यशरणंभवकेशव॥४३॥इत्युक्त्वादर्शयामासशरीरंदैत्यताडितं॥तद्ब्रह्मण्युपमा

तंतुदृष्ट्वातुक्रोधमाधव॥४४॥केनापमानितोब्रह्मन्नियमःकेनपीडितः॥कथंयस्त्वमहा
भागधर्मगोत्रेमयिस्थिते॥४५॥दुर्वासाउ०॥मुक्तितीर्थमहंज्ञात्वाज्ञानेनमधुसूदनचक्र
तीर्थेततःस्नातुंयातोहर्षसंयुतः॥४६॥अत्रांतरेस्नानएवाहंदृष्टोदैत्यदुरात्मना॥गत्वागृहीतो
ऽस्म्यहंमुष्टिभिस्ताडितस्तथा॥४७॥बलाद्गृहीत्वावासांसिकृत्वांश्चैवाश्रितैःसह॥हनिष्या
मियदिपुनःआगतोसिनसंशयः॥४८॥स्नातोहंचक्रतीर्थेतुकरिष्येनोव्रतंविभो॥तस्मा
त्त्वापयगोविंदनियमंसफलंकुरु॥४९॥तवप्रसादात्स्नात्वाचतुष्कावचीतस्मात्मानसः॥प्र
तिज्ञांसफलांलब्ध्वाविचारिष्येमहीमिमां॥५०॥इतिश्रीप्रह्लादोक्तसंहितायांद्वारकामाहात्म्ये
दुर्वासानियमोनामअष्टादशोऽध्यायः॥ ॥१८॥प्रह्लादउ०॥तत्श्रुत्वादेवदेवेशश्चिंतयित्वापु ४९
नःपुनः॥उवाचवचनंतत्रदुर्वासमसमकिल्बिषं॥१॥श्रीभगवानुवाच॥पराधीनोस्मिविप्रेंद्रभक्ति

कोतोस्मिनान्यथा॥बलेरादेशकारीवदैत्येंद्रस्यगोप्यहं॥२॥तस्मात्त्वार्थयविप्रेंद्रदैत्यंवैरो
चनिंबलिं॥अस्मादेशंकरिष्यामियदभीष्टंतवाधुना॥३॥तत्श्रुत्वावचनंविप्रोबलिं
प्रोवाचसत्वरं॥यज्विनांत्वंवरिष्ठोसिवदान्यानांत्वंमतोधिकः॥४॥अपापरक्षणरूपिणंदयांकु
रुममोपरि॥प्रेषयस्वमहाभागदेवंदैत्येंद्रनिग्रहे॥५॥संपूर्णोनियमःस्नातःत्वत्प्रसादात्कृ
ताम्यहं॥तत्श्रुत्वावचनंदैत्योनातिहृष्टमनास्तदा॥६॥दुर्वाससमुवाचैनंनदेयंभविष्या
ति॥अन्यत्प्रार्थयविप्रेंद्रयत्तेमनसिवर्त्तते॥७॥तद्दास्यामिनसंदेहोयद्यपिस्यात्सुदुर्लभं
॥दुर्वासाउ०॥नोन्यत्कथंहिमांविद्धिकिमन्यत्प्रार्थयामहे॥८॥रक्षमेजीवितंदैत्यप्रेषयस्व
जनार्दनं॥९॥बलिरुवाचनासित्वंयथाविप्रहिरण्याक्षंनिपातितं॥१०॥कृत्वायज्ञवराहस्तुमहा
रोबलादिव॥तथाचदैत्यप्रवरमवध्यंदेवदानवैः॥११॥हतवान्हिरण्यकशिपुंनृसिंहसर्वो

95/1964

ःप्रभुः॥तथाप्याहंसमनुविंश्यकाशांत्यंकेशामंनिशं॥११॥जघानमाययाविष्णुःसुरार्थंसुरसत्तम
॥प्रथमंवामनोभूत्वात्वयाचतत्पदत्रयं॥१२॥पुनस्त्रिविक्रमोभूत्वाभुवनानिजहारच।मया
पुण्यवशाद्विष्णुर्यदिप्राप्तःकथंचनः॥१३॥नाहंमोक्षेजगन्नाथंमाययावामनकंप्रभुं॥श्रीदु
र्वासाउ॥नाहंमोक्षेविनास्नानात्गोमत्युदधिसंगमे॥यदिनप्रेषयसिहरिंततस्त्वंद्रक्ष्यसेव
रं॥१४॥बलिरु॥यत्कृत्यंतद्भवत्वेतेयत्कामानासितथाकुरु॥ब्रह्मरुद्रेंद्रनमितोनाहंमोक्षेप
दद्वयं॥१५॥तथाविवदमानौतौदृष्ट्वासजगदीश्वरः॥ब्रह्मण्यदेवरूपयाब्राह्मणंतमुवाचह
॥१६॥स्वस्त्योस्तुवद्विजश्रेष्ठस्नापयिष्येनसंशयः॥हत्वादैत्यगणान्सर्वान्गोमत्युदधिसंगमे॥
१७॥प्रह्लादउ॥श्रुत्वाभगवतोवाक्यंब्राह्मणस्समदैत्यराट्॥दृढंजग्राहचरणौपतित्वापाद ५०
योस्तदा॥१८॥ततःसहर्षिभिगमत्पादौदत्वाबलिःप्रभुः॥शंखचक्रगदापाणिःशार्ङ्गधनुर्ध्र

नुः॥१९॥सुशालीत्वयतोगत्वाऽदुर्वासिसमन्वितः॥प्रस्थितौतौतदादृष्ट्वाऽदुर्वासाश्रीजनार्दनौ॥
२०॥अनंतस्त्वयतस्तेषांजगामसुशान्लायुधः॥शंखचक्रगदापाणिःशार्ङ्गधनुर्धरःप्रभुः॥२१॥सु
शालीस्त्वग्रतस्तेषांतयोर्विष्णुस्त्रिविक्रमः॥तयोस्तुगमद्विप्रोदुर्वासाभूतलाद्वहिः॥२२॥
भित्वारसातलंसर्वेसमुत्तस्थुर्त्वरान्विताः॥आविर्बभूवतत्सर्वेगोमत्युदधिसंगमे॥२३॥संनद्धौ
दृढधन्वानौसंकर्षणजनार्दनौ॥ऊचतुस्तदाविप्रेंद्रंकुरुस्नानंयदृच्छया॥तयोस्तुवचनंश्रुत्वास्ना
नंचक्रेत्वरान्वितः॥२४॥स्नात्वाचावश्यकंकर्मकृतमारभतदाद्विज॥२५॥इतिश्रीद्वारकामाहात्म्ये
ब्रह्मागमनोनामएकोनविंशतिमोऽध्यायः॥ ॥७॥ ॥श्रीप्रह्लादउ॥ब्रह्मघोषध्वनिंश्रुत्वादानवो
दुर्मुखस्तदा॥क्रोधसंरक्तनयनोदुर्वाससमथाब्रवीत्॥१॥हन्यमानस्तुमस्माभिर्यदिमुक्तोसिवै
द्विजः॥कस्मात्पुनरिहाजातोमरणायसमंदधीः॥२॥इत्युक्त्वादानमुष्टिनाहंतुमधावदुष्टदानव

97/1964

॥ तं दृष्ट्वा दानवं विष्णुर्ब्राह्मणं हंतुमुद्यतं ॥३॥ चक्रेण क्षुरधारेण शिरश्छिछेद लीलया ॥ प्रह्लादउ
॥ डमुखं निहतं दृष्ट्वा दानवो दुःसहस्तदा ॥४॥ प्राक्रोशदुच्चैर्दितिजान् शीघ्रमागम्यतामिति ॥ श्रु
त्वा दैत्यगणाः सर्वे डुमुखं विनिपातितं ॥५॥ डर्मिसं संपुनस्त्राडं परितं त्र च विष्णुना ॥ क्रूमहृष्टो
गोलकश्च क्रोधनो वेददूषकः ॥६॥ यज्ञघ्नो यज्ञहंता च ब्रह्मांतकतपस्विहा ॥ एते चान्ये च बहु
वो विविधायुधपाणयः ॥७॥ क्रोधसंरक्तनयनाः शपंतो ब्राह्मणं तदा ॥ परिक्षिप्य तदा दात्रेयं
विष्णुं संकर्षणं तदा ॥८॥ तोमरैर्भिंडिमालैश्च मुशलैश्च मुखंडिभिः ॥ शस्त्रैर्नानाविधैश्चापि युयु
धुः क्रोधमूर्छिताः ॥९॥ दानवैः संवृतो विष्णुः समंताद्घोरदर्शनैः ॥ संकर्षणश्च सुसुस्ते वंशादित्यो
धनैरिव ॥१०॥ जगृहुर्धनुषी दिव्ये ववर्षुः शरवृष्टिभिः ॥ ते मार्गणागणान् दैत्यास्तयोर्मुक्तान्निजघ्न ५१
॥११॥ ते हन्यमानाः समरे विष्णुना विद्रुता दिशः ॥ दानवान् विद्रितान् दृष्ट्वा विष्णुना निहतस्तव

॥ वविकलश्चागोलकः पृष्ठस्य सांतेः स्वत्वा निवर्तितः ॥ संकर्षणं गोलकस्तु निजघान त्रिभिः शरैः ॥२
३॥ अनंतं व्यथितं दृष्ट्वा ताडंत्रेतीव विक्लवः ॥ स्वस्ति संकर्षणायास्तु ब्रह्म ब्रायांज संस्तपं ॥२४॥ तं
शपंतं तदा दृष्ट्वा गोलकः क्रोधमूर्छितः ॥ उत्पत्य तरसा मूर्ध्नि दुर्विमिस मताडयत् ॥२५॥ स मुष्टिघा
तान्निहतः शाक्रोशत्पतितो क्षितौ ॥ संकर्षणं च पतितं मुष्टिना मूर्ध्नि ताडितं ॥२६॥ दृष्ट्वा खु कोप
समगवान् तिष्ठ तिष्ठेति चाब्रवीत् ॥ तं गृह्य मुशलं वीरो जघान समरे रिपुं ॥२७॥ मुशलेन हतो मूर्ध्नि
गोलको विकलेंद्रियः ॥ स विभिन्नास्थिमास्तिष्कः पपात च ममार च ॥२८॥ गोलकं पतितं दृष्ट्वा क्रंदं
तं ब्राह्मणं तदा ॥ क्रूमहृष्टाय सगवान् विष्णुं हंतुं मनो दधे ॥२९॥ नाराचेन सुवीक्षोन वजघान क्रूद
पेरिपु ॥ स विष्णुबाणाणाभिहतो सक्रुशास्त्र पलायत ॥३०॥ तस्मिन्पलायिते तस्मिन्बले क्रूमहृष्टे वदा
नवे ॥ अमसत्तबलं सर्वं विद्रुतं च दिशो दश ॥३१॥ तत्र नग्नं बलं सर्वं निहतं गोलकं तथा ॥ तथा स्व

ःकथयामास दैत्यराज्ञः कुशाय च ॥२१॥ गोलकं निहतं पञ्चपसर्वान् दैत्यांश्च दैत्यराट् ॥ योद्धुमा-
ज्ञापयामास संनद्धस्य बलस्य च ॥२२॥ आज्ञां कुशाश्च ते लब्ध्वा दैत्याः पंचजनोन्मुखाः ॥ युद्धायाभि-
मुखाः सर्वै रथैर्नागैश्च निर्ययुः ॥२३॥ आनीकं दशसाहस्रं कूर्मपृष्ठश्च निर्ययौ ॥ अयुते द्वे रथा-
नां तु नागानामयुतं तथा ॥२५॥ दश आयुतानि चाश्वानां महासुरपरिग्रहः ॥ वकश्च निर्ययौ दैत्यो
बकूसैन्यसमन्वितः ॥२६॥ तथा दीर्घनखो दैत्यो सेनानीके तु संवृतः ॥ मंत्रिपुत्रौ महामात्यौ दैत्य-
राजकुशस्य तौ ॥२७॥ निर्ययौ विद्युतो दैत्यः प्रवसश्च महाबलः ॥ ऊर्ध्वबाहुर्वक्रग्रीवः कंचुक-
श्च ग्रीवोल्मुकौ ॥२८॥ ब्रह्मघ्नो यज्ञकोपश्च राहुर्बर्बरकस्तथा ॥ सुनामा च सुनामा च मंत्रिणो बु-
द्धिसत्तमौ ॥२९॥ सेनापतिश्चोग्रदंष्ट्रस्तस्य च्वाना महाहनुः ॥ एते चान्ये च बहवो दैत्याः क्रोधसमन्वि- ५२
ताः ॥३०॥ महानारथघोषेण निर्ययुर्युद्धकांक्षिणः ॥ स्नाताः शुक्लांबरधरः शुक्लमाल्यविभूषि-

तः ॥३१॥ कुशः शंभुं महादेवं भवानीपतिमव्ययं ॥ अर्चयामास नूलेशं परमेण समाधिना ॥ 101/1964
३२॥ पंचामृतेन संस्नाप्य तथा गंधैर्विलिप्य च ॥ अर्चयामास मदैत्ये पुष्पानेककुसुमोत्करैः ॥
३३॥ गीतवादित्रशब्दैश्च तथा मंगलवादनैः ॥ पूजयित्वा महादेवं ब्राह्मणान्स्वस्ति वाच्य च
॥३४॥ भूषयित्वा भूषणैश्च मणिवज्रविभूषितैः ॥ मुकुटेनार्कवर्णेन ज्वलज्भास्कररोचिषा ॥३५॥
भ्राजमानो दैत्यराजो हारेणातीव शोभुना ॥ संनह्य च महाबाहुः सारथिं समुदीक्ष्य च ॥३६॥
सुनामानं व सुनामानं मंत्रिणौ वाक्यमब्रवीत् ॥ कस्मा यमवरान्हंति किमर्थं ज्ञायतामिति कि-
मर्थं ज्ञायतामिति ॥३७॥ तमात द्वचनं श्रुत्वा रुरुर्वचनमब्रवीत् ॥ गतो हि ब्राह्मणः स्नातुं गोमत्याः
संगमे किल ॥३८॥ आगतः प्रतिषिद्धः स दैत्यस्तव महीपते ॥ तेन विष्णुः समानीतः सर्सकर्षणसम-
न्वितः ॥३९॥ सोऽस्मान्हंति महाराज ब्रह्मण्यो जगदीश्वरः ॥ सुनामा उ ॥ स्नात्वा गच्छतु विप्रो सोवा

सुदेवसमन्वितः॥४०॥राजन्नृथाविग्रहेणकिंकार्यंकथयस्वनः॥तस्यतद्वचनंश्रुत्वाकुशःक्रो
धसमन्वितः॥४१॥कथंगोलकहंतारंनहनिष्यामिकेशवं॥एतावदुक्त्वासंक्रुद्धोययौदैत्यपति
स्तदा॥४२॥भेरीशंखमहाशब्दैःजयशब्दैश्चपुष्कलैः॥ददर्शतत्रदेवेशंसहस्रशिरसंप्रभुं॥
४३॥तथाविष्णुंचक्रपाणिंडुवसिसमकिल्बिषं॥ईश्वरांशांचतंदृष्ट्वानहंतव्योपमीश्वरः॥४४॥
विष्णुमुद्दिश्यतान्सर्वान्प्रेरयामासदानवान्॥नागैःपर्वतसंकाशैःरथैर्जलदनिःस्वनैः॥
४५॥अश्वैर्महाजवैश्चैवपरिवार्यसमंततः॥ततोयुद्धंसमभवद्देवयोर्दानवैःसह॥४६॥
खड्गादितोद्वंद्वयुद्धोदैत्यैर्देवगणास्तथा॥ततोगृहीत्वामुशलंहलंचबलवान्बली॥४७॥ज
घानदैत्यप्रवरान्कालांतकयमोपमान्॥तेहन्यमानादैत्येयाबलेनबलशालिना॥४८॥ ५३
सर्वतोविद्रुतानष्टाःकुशमेवप्रजग्मतुः॥वकश्चयज्ञकोपश्चब्रह्मघ्नोदेवदूषकः॥४९॥महा

मुखःखंजनकोराहुश्चक्रशिरस्तथा॥एतेचान्येवहवःप्रवरादानवोत्तमाः॥५०॥क्रोधसं
रक्तनयनाबिभिदुस्तेजनार्दनं॥ततःकोपसमाविष्टोसंकर्षणजनार्दनौ॥५१॥चक्रलांगू
ललक्षाभ्यांजघ्नतुर्दानवर्षभान्॥चक्रेणचशिरःकायाच्चिच्छेदाशुबकस्यच॥५२॥चूर्णयामाससु
शलीयज्ञहंतारमेवच॥राहुंजघानचक्रेणतथान्यान्मुशलेनच॥५३॥तेहन्यमानानष्टाश्च
जग्मतुःप्रदिशोदिशः॥कुशःस्वांवाहिनींदृष्ट्वाविद्रुतांनिहतांतथा॥५४॥क्रोधसंरक्तनयना
याहियाहीतिसारथिं॥समयोरंतिकंदृष्ट्वानामविश्राव्यचात्मनः॥५५॥उवाचकस्त्वंदैत्येयान्स
महंहितदाधर॥५५॥श्रीकृष्णउ॥यस्माद्धिमुक्तिदंपुण्यंगोमत्युदधिसंगमं॥५६॥रुद्धंदुरात्म
भिःपापैःतस्मात्तेनिहतामया॥५६॥कुशोवाच॥मांजानामिचात्रस्थंकथंजीवन्नयास्यसि॥
५७॥युद्धस्वत्वंस्थिरोभूत्वाततस्त्वद्धामिकलेवरं॥इत्युक्त्वापंचविंशत्याताडयामासकेशवं॥५८

103/1964

अनंतंचाष्टाभिर्बाणैर्हत्वात्रेयंनिरीक्ष्यच॥ईश्वरांशांचतंमत्वापुत्रत्वंयाहिमाचिरं॥५०॥सबा
णैर्निहतसर्वांगःशार्ङ्गंदिधनुषांवरं॥विव्यधघातयामासचक्रनिर्भिन्नुरोहयान्॥५१॥सारथे
स्तुशिरःकायादर्धचंद्रेणचिच्छिदे॥धनुश्चैकेनचिच्छेदध्वजमेकेनपत्रिणा॥६१॥सछिन्नधन्वावि
रथोहताश्वोहतसारथिः॥संबोध्यचमहात्मानमुवाचवचनंहरिः॥६२॥यदित्वांपातयिष्यामि
कीर्तिमिद्युतलाभवेत्॥घातितोहंत्वयावीरयास्यामिपरमांगतिं॥६३॥तिष्ठतिष्ठहरेःस्थानं
शरणंमेसदाशिवः॥एवमुक्त्वाउथावंतंखड्गहस्तंमदारिपुं॥६४॥चक्रेणसितधारेणशिरश्चि
छेदलीलया॥तंछिन्नशिरसंभूमौपतितंवीक्ष्यदानवं॥६५॥अथोवाहरथेनाजौदैत्यःखंजनक
स्तथा॥अपयातंकृशंदैत्यंविष्णुसंकर्षणस्तदा॥६६॥दृष्ट्वासमास्वसहिताःसैन्यवर्त्तेनहर्षिता ५४
शिवालयेतुपतितंकुशंनिक्षिप्यदानवाः॥६७॥स्नानगंधाक्षतैर्नैरुद्रंगीतवाद्यैरतोषयत्

105
1964

॥अवापजीवितंसद्यःप्रसादाच्छंकरस्यच॥६८॥उत्थितःसतदादैत्योक्रवन्त्रिशवत्रिवेतिच
॥तंपुनर्जीवितंदृष्ट्वादैत्यंदैत्यगणास्तदा॥६९॥उवाचसुमनावाक्यंवर्द्धस्वसुचिरंविभो॥स्ना
पयित्वाब्राह्मणांश्चविष्णुर्पादिन्निवर्त्तते॥७०॥यथेष्टंगच्छतत्तदाकिंवृथाविग्रहेणते॥तस्यतद्व
चनंश्रुत्वाकृशोवचनमब्रवीत्॥७१॥गत्वाप्रेषितौपापौविप्रत्राणकराकुलौ॥सचराजासमादि
ष्टःसुमनामंत्रिसत्तम॥७२॥उवाचविष्णुमानम्यतमसक्त्वाहत्वायुधं॥कुशेनप्रेषितश्चास्मित
वपार्श्वेजनार्दन॥७३॥किंत्वयापरतंत्रेणाथयेनदैत्यान्जिघांससि॥दृष्ट्वासिसंस्नापयित्वागच्छ
मुक्तोसिमानद॥७४॥अमरत्वंमहादेवात्प्राप्तंविद्धिकुशेनहि॥७४॥श्रीनभउ॥मुक्तितीर्थ
मिदंरुद्रंस्नवद्भिःपापकर्मभिः॥७५॥तस्मात्त्वहनिष्येसवान्दाचान्नात्रसंशयः॥भगवद्वचनं
श्रुत्वासुमनावाक्यमब्रवीत्॥७६॥दृष्ट्वासिसत्तुयेदत्तीतिज्ञाश्चैवाद्यतैःसह॥पुनस्नानान

यद्धं हि क्षिप्तापे वरुणालये॥७७॥ दुर्वाससं समासाद्य भगवान् गृहमाविशं॥ श्रीसमेत॥
सवाहनपरीवारः सपुत्रज्ञातिबांधवाः॥७८॥ तुष्णनीयमिदं त्यक्त्वा प्रविशाध्वं धरातलं॥७
८॥ सुनाभास्तद्वचः श्रुत्वा क्रोधसंरक्तलोचनः॥ युध्यध्वमिति वोक्त्वा नैव देवं न विष्णुति
॥७९॥ कश्यपकथ्यमानस्य दुक्कंशार्ङ्गधन्वना॥ क्रुद्धस्तद्वचनं श्रुत्वा मंत्रिणा समुदी
रितं॥८०॥ रथमारुह्य वेगेन ययौ योद्धुमरिंदम॥ संस्मृत्य मनसा देवं पिनाकं वृषभध्वजं
॥८१॥ ततः प्रवर्त्तितं युद्धं तुमलं रोमहर्षणं॥ अन्येषां दानवानां च केशवस्य कुशासाच॥८२॥
यज्ञघ्नो गदया गुर्व्या संकर्षणमताडयत्॥ संकर्षणाहतं शीर्षं मुशलेन पपात ह॥८३॥ कंबुकंठ
जघानाशु चक्रेण भगवान् हरिः॥ उल्मुकश्चापि निहतो भ्रमघ्नश्च निपातित॥८४॥ सेनाकाश्च ५५
शल्लेन नवलक्ष निपातिताः॥ एते चान्ये च बहवो घातिताः केशवेन हि॥८५॥ दानवान् नि

हतान् दृष्ट्वा कुशाः परमकोपनाः॥ जघान युधि संरब्धः परमास्त्रेण केशवं॥८६॥ भगवा
न् क्रोधसंयुक्तश्चक्रेणाहनत च्छिरः॥ तच्छिन्नशिरसं भूमौ पतितं वीक्ष्य केशवः॥८७॥ विच्छि
द्य बाहू पादौ च खंडशस्त्रिजगतां तथा॥ खंडशो घातितं दृष्ट्वा केशवेन कुशं तदा॥८८॥ संगृह्य त
पुनर्दैत्यानि सूः सर्वैः शिवालयं॥ प्रासादान्तः शूलिनः स्थो जीवितं प्राप्य दानव॥८९॥ उच्छितः
सहसा क्रुद्धः क्व विष्णुरिति चाब्रवीत्॥ गदामुद्यम्य संक्रुद्धो योद्धुमागात् जनार्दनं॥९०॥ तमु
द्यतगदं दृष्ट्वा निहतं जीवितं पुनः॥ दुर्वासस मथोवाच किमिदं नश्यते यत॥९१॥ मया स
न्तच्छिरश्छिन्नं खंडशश्छिन्नशः स्वतं॥ जीवं त्वमेषो पुनः कस्मात् कारणं कथयस्व नः॥९२॥ इ
युक्तः क्षितया मास ध्यानेन ऋषिसत्तमः॥ ज्ञात्वा तत्कारणं सर्वमुवाच मधुसूदनं॥९३॥ महादे
वेन तुष्टेन कुशोयममरः स्मृतः॥ खंडशोपि स्नतो यस्मात् स च प्राणैर्वियुज्यते॥९४॥ ततः श्रुत्वा

107/1964

विस्मयाविष्टोहंतव्यो यंकथंमया॥उपायनंकरिष्यामियेनायंनभवेदिति॥९५॥ततःसंजीवितं
प्राप्यप्रसादात्शंकरस्यच॥खड्गवमनिधादायतिष्टतिष्टेतिचाब्रवीत्॥९६॥तमायांतंपुनर्दृ
ष्ट्वाकुशंशिवपरिग्रहं॥जघानगदयागुर्व्यागदाहस्तोगदाकुशं॥९७॥सन्निन्नमूर्ध्निपतत्के
शवेनाभिताडितः॥तन्मूर्ध्नोपलितंवेगात्परिगृह्यकुशंहरि॥९८॥गर्त्तेनिक्षिप्यतदेहंपूरयामास
वैपुनः॥लिंगंसंस्थापयामासतस्योपरिजनार्दनः॥९९॥सलब्धसंज्ञोदनुजशिवलिंगमपश्यय
त्॥आत्मदेहोपरिस्थातुंतदाचिंतापरोभवेत्॥१००॥इतिश्रीप्रह्लादोक्तसंहितायांश्रीद्वारका
माहात्म्येकुशदैत्यवधोनामविंशतितमोऽध्यायः॥ ॥७॥ ॥श्रीप्रह्लादउ॥शिवलिंगमलिंघ्यंहिबु
द्धिपूर्वंहतोस्म्यहं॥उवाचत्वंसदनुजबलिनोहंत्वयानघ॥१॥श्रीलक्ष्मउ॥यदितुष्टोस्मितेदैत्य ५६
शौर्येण॥शिवसंश्रयात्वरंवरयभद्रंतेयदीच्छसिमहामते॥२॥कुशउ॥यथापूज्योमहादेवःमम

त्वंचतथाहरे॥अन्यच्चानुग्राह्यपद्यहंतेममकीर्त्तिर्एकएवाद्ययीमूर्त्तिस्मात्त्वंवरयाम्यहं॥३॥
॥शिवलिंगंत्वयानाथस्थापितंयन्ममोपरि॥मन्नाम्नातद्भवत्कुशेशइतिविश्रुतः॥४॥अनुग्रा
ह्यापद्यहंतेममकीर्त्तिर्निविवियं॥एवंसविष्णुनाप्युक्त्वातत्रैवावस्थितोहरिः॥५॥ततोन्यदानवान्
सर्वान्द्रावयामासकेशवः॥रसातलंगताकेचित्केचिद्दिक्षुसमाश्रिताः॥६॥अनंतःसंस्थितस्त
त्रविष्णुस्त्वलदनंतरं॥ज्ञात्वाविमुक्तिदंतीर्थंदुर्वासास्तत्रसंस्थितः॥७॥एवंत्रिविक्रमःस्वामीतदा
प्रभृतिसंस्थितः॥कलौपुनःकलांन्यासात्त्रल्लवंमगमस्तु॥८॥गोमतीचक्रतीर्थेचक्रतीर्थ
सगावांश्चत्रिविक्रमः॥तेनेदंमुक्तिदंमत्वादुर्वासास्तत्रसंस्थितः॥९॥श्रीप्रह्लादउ॥विशेषात्फल
दःप्रोक्तप्रजितोमधुमाधवे॥मधुसूदनोनरोयस्तुद्वारवत्यांकरोतिच॥१०॥पूजयेच्छलदेवंचस्ना
पयित्वाविलिप्यच॥गंधैश्चवाससाच्छाद्यधूपपुष्पैरनेकशः॥११॥नैवेद्यभूषणैश्चैवसतांबूलेनफलेन

109/1964

च॥आरात्रिकेणसंपूज्यदंडवत्प्रणिपत्यच॥१२॥घृतेनदीपकंदद्यात्रात्रौजागरणंतथा॥कु
र्याद्गीतवादित्रैःतथापुस्तकवाचनैः॥१३॥कृत्वाजागरणंरात्रौसर्वान्कामानवाप्नुयात्॥पि
तॄणांवांछयाप्राप्तिःसफलास्तुमनोरथाः॥१४॥प्रबोधवासरेप्राप्तेकार्त्तिकेद्विजसत्तमाः॥संपू
ज्यकृष्णदेवेशंपरांगतिमवाप्नुयात्॥१५॥तथानंतमिमंपूज्यस्वपनेदक्षिणोत्तरे॥आषा
ढेचैवतुमासेपौषादिमासेदशीसुच॥१६॥कलौतत्रपूजयित्वागोमत्युदधिसंगमे॥विमलं
लोकमाप्नोतियत्रगत्वानशोचति॥१७॥इतिश्रीप्रह्लादोक्तसंहितायांश्रीद्वारकामाहात्म्ये
कुशेश्वरस्थापनकंनामएकविंशोऽध्यायः॥ ॥छ॥ ॥श्रीप्रह्लादउ०॥शृणुध्वंद्विजशार्दूला
यथावत्कथयामिवः॥स्नापयित्वाजगन्नाथंतथागंधैर्विलिप्यच॥१॥पूजयित्वातुलस्यादि ५७
न्भूषयित्वाचभूषणैः॥नैवेद्येनचसंतर्प्यतथानीराजनादिभिः॥२॥दुर्वाससंतथापूज्यपुं

डरीकाक्षमेवच॥गणेशंवैनतेयंचस्वशक्त्यापूजमानवः॥३॥दद्याद्दानंयथाशक्त्यावित्त
शाठ्यविवर्जितः॥दीनांधकृपणांस्तत्रतर्पयित्वसमाश्रितान्॥४॥रुक्मिणींचततोलो
गभेद्विदन्नतिनयान्नरः॥उपहारोपहारांश्चबलिनिर्गंधदीपकैः॥५॥पीडयंतिग्रहास्ताव
न्व्याधयोनिर्नवंतिच॥नक्रयानपश्यतेयावत्कल्लोलप्रियान्तरः॥६॥तावन्मृतप्रजाना
रीदुर्भगादुःखसंयुता॥नक्रयानपश्यतेयावत्कल्लोलप्रियान्तरः॥७॥तावद्दरिद्रोदुःखी
चनवतेपरयाचकः॥नक्रयानपश्यतेयावत्कल्लोलप्रियान्तरः॥८॥तावत्शत्रुजनंपंडु
सांगृहंगंचमर्षिता॥नक्रया०॥१०॥संपूज्यचतल्पंविधिवत्॥ततोगर्भेश्वरुक्मिणीं॥स्नापयेद्दधि
दुग्धेनइक्षुलोकेपरत्रचमधुनाशर्करयातथा॥११॥घृतेनविविधैर्गंधैःतथात्विक्षुरसेनच॥तीर्थो
दकेनसंस्नाप्यसर्वान्कामानवाप्नुयात्॥१२॥एवंयःस्नापयेद्देवीरुक्मिणीहरिवल्लभां॥न

111/1964

तस्य दुःखं न किंचित् इह लोके परत्र च ॥१२॥ श्रीखंडकुंकुमेनैव तथा मृगमदेन च ॥ विलेपये
द् पुत्र त्वमधनत्वं न पश्यति ॥१३॥ सदा सन्नोगी भवति रूपवान् जनपूजितः ॥ पूजयेन्मालती
पुष्पैः शतपत्रैः सुगंधिभिः ॥१४॥ करवीरैर्मल्लिकाभिस्तुलस्या राजचंपकैः ॥ कमलैर्वारिसंभू
तैः केतकीभिश्च पाटलैः ॥१५॥ धूपं धूपेनागुरुणा चैव धूपयेत् गुग्गुलेन वा ॥ वस्त्रैः सुकोमलैः शु
भ्रैः नानादेशसमुद्भवैः ॥१७॥ नक्ष्या मंत्राद्यवेदनी रुक्मिणीं सम्भवल्लभां ॥ भूषणैर्भूषयेद्दे
वीं मणिरत्नविभूषितैः ॥१८॥ तस्मिन्कुलेन्यसौख्यं स्यात् न पुत्रो नाधनस्तथा ॥ पतितो न वि
कर्मभिः कितवो नीचसेवकः ॥१९॥ सपूजिता जगन्माता रुक्मिणी मानवैः कलौ ॥ नैवेद्येन मनो
ज्ञेन देवी मे प्रीयतामिति ॥२०॥ तांबूलं च सकर्पूरं भावेन विनिवेदयेत् ॥ गृहीत्वा च फलं शुभ्रं च ५८
क्षतैः सुसमन्वितं ॥२१॥ मंत्रेणानेन विप्रेंद्रा अर्घं दद्याद्विधानतः ॥ लक्ष्मिप्रिये नमस्तुभ्यं विदर्भा

धिपनंदिनि ॥२२॥ सर्वान्कामान्प्रदे देवि गृहाणार्घं नमोस्तु ते ॥ आरात्रिकं ततः कुर्यात्प्रज्व
लितं भावनान्वितः ॥२३॥ नीराजनं प्रकुर्वीत कर्पूरेण विशेषतः ॥ शंखे कृत्वा तु पानीयं पंचाम
येश्राव संयुतः ॥२४॥ भ्रामयित्वा त्रिरमाधरणीयं विशुद्धये ॥ दंडवत्प्रणमेद्भूमौ नमः ल
क्ष्मिप्रिये ति च ॥२५॥ विप्रपत्नीश्च विप्रांश्च पूजयेद्वित्तशक्तितः ॥ ग्रीवासूत्रकसिंदूरैर्वासोभि
कंचुकैस्तथा ॥२६॥ सुगंधकुसुमैरर्च्य कुंकुमेन विलिप्य च ॥ कोसुंभकैः कज्जलेन तांबूलेन च
तोषयेत् ॥२७॥ नद्यै नोऽन्यैर्मोदकैश्च इक्षुभिर्मधुसर्पिभिः ॥ प्रीतो भवति देवेशो रुक्मिण्या स
ह केशवः ॥२८॥ विशेषतः फलानीह दातव्यानि द्विजोत्तमाः ॥ उन्मस्तकं ततो देवं द्वारपालं
प्रपूजयेत् ॥२९॥ नैवेद्यैर्भक्ष्यभोज्यैश्च मांसेन सुरया तथा ॥ प्रभूतबलिभिश्चैव पिष्टेन विवि
धेन च ॥३०॥ स्नापयित्वा सुगंधेन कुंकुमेन विलिप्य च ॥ धूपेन धूपयित्वा तं पुष्पमाल्यैः प्रपू

113/1964

जपेत्॥३१॥योगिनीनां चतुःषष्टिः पीठेतस्मिन्प्रपूजयेत्॥ अर्चयेद्वरसिद्धिं च क्षेत्रपालां
श्च सर्वतः॥३२॥ विघ्नपस्वामिनी तत्र तथा वै सप्तमातरः॥ अष्टमूर्त्तिस्थितां पद्मां पीठे तस्मिन्प्र
पूजयेत्॥३३॥ रुक्मिणीं सत्यभामां च देवीं जांबुवतीं तथा॥ मित्रविंदां च कालिंदीं भद्रां नाग्न
जितीं तथा॥३४॥ संपूज्य लक्ष्मणां तत्र वैष्णव्यः कृष्णवल्लभाः॥ ताः संपूज्य विधिवत्संपूज्य घृत
पायसैः॥३५॥ गीतवादित्रघोषैश्च दीपजागरणेन च॥ सर्वान्कामानवाप्नोति विष्णुः तस्य प्रसी
दति॥३६॥ जीवति व्याधिनिर्मुक्तो ऋद्धिवृद्धिसमन्वितः॥ किं तस्य बहुभिर्दानैः किं व्रतैर्नियमै
स्तथा॥३७॥ येन दृष्टा जगन्माता रुक्मिणी कृष्णवल्लभा॥ किं यज्ञैर्बहुभिस्तस्य संपूर्णवरद
क्षिणैः॥३८॥ येन दृष्टा जगन्माता रुक्मिणी कृष्णवल्लभा॥ तेन दत्तं हुतं तेन जप्तं तेन सनातनं ५९
॥३९॥ येन दृष्टा हेलया तेन संप्राप्ताः सिद्धयोष्टौ न संशयः॥४०॥ येन दृष्टा गतागारवती येन दृष्टा ह

115/1964

रिवल्लभा॥ सफलं जीवितं तस्य मानुष्यं जन्म एव च॥४१॥ कलौ दृष्टा कृष्णपुरीं गत्वा माधवव
ल्लभा॥ देवराज्येन किं तस्य तथा मुक्तिपदेन च॥ येन दृष्टा जगन्माता रुक्मिणी कृष्णवल्लभा॥ तस्मा
त्सर्वप्रयत्नेन रुक्मिणी कृष्णवल्लभा॥४४॥ सदार्चनीया मनुजैः द्रष्टव्या सर्वकामदा॥ विशेष
तः पूजनीया नवरात्रं सदाश्विने॥४५॥ नवम्यां तु नरैर्यैस्तु पूजिता हरिवल्लभा॥ स्नानगंधादि
वस्त्रैश्च धूपनैवेद्यबलिभिस्तथा॥४६॥ गीतवादित्रघोषैश्च दीपजागरणेन च॥ तोषिता नीश्वकसु
ता सर्वान्कामान्प्रयच्छति॥४७॥ तथा दीपोत्सवदिने चतुर्दश्यां समाहितः॥ पूजयित्वा य
था कामममीप्सितं लभते फलं॥४८॥ माघमासि सिताष्टम्यां कंदर्पजननी तु ये॥ पूजिता गंध
पुष्पाद्यै रूपहारैरनेकधा॥४९॥ सफलं जीवितं तस्य सफलाश्च मनोरथाः॥ द्वादश्यां चैत्रमासे
तु कृष्णेन सह रुक्मिणी॥५०॥ ये पश्यंति नरा देवीं रुक्मिणीं मधुमाधवे॥ कृष्णेन सह गच्छंति ते

धन्यामानवाभुवि॥५१॥पुत्रपौत्रसमायुक्तोधनधान्यसमन्विताः॥जीवंतिव्याधिनिर्मुक्तोपदंगछं
त्यनामयं॥५२॥ज्येष्ठाष्टम्यांयेतुपूजितान्नलक्षवर्त्तनाः॥तेषांमनोरथावाप्तिर्भवतेनात्रसंशयः॥५
३॥तथान्नाद्यपदेमासितंतुपूजान्नत्ताश्चये॥सर्वपापविनिर्मुक्तायांतिविष्णुपदंनराः॥५४॥का
र्त्तिकेपूजयतियोवैशुक्लद्वादश्यांरुक्मिणीलक्षसंयुतां॥येपश्यंतिनरास्तेषांनभयंविद्यते
क्वचित्॥५५॥यःपूजयतिवैभक्त्यारुक्मिणीलक्षसंयुतां॥सफलंजीवितंतस्यचाक्षयापुत्र
संततिः॥५६॥पुष्कलंधनधान्यंचकदानैवदरिद्रता॥एवयोरुक्मिणींपश्येत्पूजयेल्लक्षमे
वच॥५७॥स्नात्वाचसर्वतीर्थेषुदानंशक्त्याददातियः॥तस्यपुण्यफलंचैवकलौयद्भवते
द्विजा॥५८॥कथंतंतदशेषेणकलौलक्षस्यसंततिः॥द्वारवतींविनाविप्रामुक्तिंनप्राप्यतेक ६०
लौ॥५९॥पुराणसंहितामेतांशृणवान्नबलिबंधनः॥ददौसत्वप्रसादायपक्षादायमहात्म

ने॥६०॥ऋषिभ्यःकथयामाससदृष्टोदैत्यसत्तमः॥शृणुयात्योनरोभक्त्यायःपठेत्भावसंयु
तः॥६१॥सर्वान्कामानवाप्नोतिविष्णुलोकंचगच्छति॥६२॥इतिश्रीस्कांदोक्तसंहितायांश्री
द्वारकामाहात्म्येरुक्मिणीरथयात्रावर्णनोनामद्वाविंशोऽध्यायः॥ ॥छ॥श्रीमार्कंडेयउ॥द्वा
रकायास्तुमाहात्म्यंइंद्रद्युम्ननिबोधमे॥कलौनिवसतेयत्ररुक्मिणीपतिकेशवः॥१॥कलौत्व
ल्पमाहात्म्येयेशृण्वंतिपठंतिच॥नतेषांभवतेवासोयमलोकेयुगाष्टकं॥२॥नित्यंत्वल्पकथायस्य
श्रवणादपिगरीयसी॥नतस्यदुर्लभंकिंचिदिहलोकेपरेत्र॥३॥मन्वंतरसहस्रंतुकाश्यांवैयत्फलं
स्मृतं॥तत्फलंद्वारकावासेवसतांपंचभिर्दिनैः॥४॥कलौनिवसतेयस्तुस्वपचोद्वारकांयदि॥य
तीनांगतिमाप्नोतिप्राकृतेवंप्रजापतिः॥५॥द्वारकांगच्छमानस्यपत्पदंनरनायक॥फलंप्राप्नो
तिमनुजःकुरुक्षेत्रेसमुद्भवं॥६॥सोमग्रहशतेनापियत्फलंसोमनायके॥दृष्टेतत्फलमाप्नोति

117 / 10164

द्वारवत्यां दिने दिने ॥७॥ पुष्करे कार्त्तिकीं स्नात्वा यत्फलं वर्षकोटिभिः ॥ तत्फलं द्वारकावासे प्रत
हं नरनायक ॥८॥ अवंत्यां यत्फलं प्रोक्तं मन्वंतरसहस्रं तपः ॥ तत्फलं द्वारकां गत्वा दिनैकेन सं
शयः ॥९॥ रूपं द्वारावतीं गत्वा दृष्टो देवकिनंदनः ॥ फलं कोटिस्तु देवानां व्रतलक्षशतैः कृवा
॥१०॥ कलौ निवसतां नृप धन्यास्तेषां मनोरथाः ॥ कृष्णस्य दर्शनं नित्यं द्वारकागमनं प्रति ॥१
१॥ धन्यास्ते सतत ये त्वास्ते वंद्यास्ते लोकपावनाः ॥ दृष्टं कृष्णमुखं येस्तु पापकोटियुतापहं ॥१२
॥ एकोपि द्वादशी लोके यः करोति द्विजोत्तमाः ॥ कृष्णस्य संनिधौ नृप द्वारकायां फलं शृणु ॥
१३॥ यत्फलं व्रतसंयुक्तैः वासरैः कृष्णसंज्ञिकैः ॥ शतैर्दशाभिराप्नोति द्वारकायां तदेकया ॥
१४॥ क्षीरस्नानं प्रकुर्वंति ये नराः कृष्णसंज्ञिके ॥ शतैर्दशाभिराप्नोति मूर्द्धि शताश्वमेधजं पु ६१
ण्यं बिंदुना बिंदुना बिंदुना स्मृतं ॥१५॥ क्षीराद्दशगुणं दुग्धो घृतं चैव दशोत्तरं ॥ घृताद्दशगु

णं क्षौद्रं क्रबुना च दशोत्तरं ॥१६॥ पुष्पोदकं च दन्नोद्धिं वर्द्धते च दशोत्तरं ॥ मंत्रोदकं च गांधेदं
तथैव नृपसत्तम ॥१७॥ इक्षुरसं चूतरसं शतवाजिमखैः समं तथैव तीर्थनीरं च फलं पठंति
नृप ॥१८॥ स्नपनं कृष्णदेवस्य यः करोति स्वशक्तितः ॥ फलं प्राप्नोति तस्योक्तं निष्कामो मु
क्तिमाप्नुयात् ॥१९॥ कृष्णस्नानोदगात्रं तु वस्त्रेण परिमार्जति ॥ तस्माल्लक्षार्जितस्यापि न
वते पापमार्जनं ॥२०॥ स्नापयित्वा जगन्नाथं पुष्पमालावरोहणं ॥ कुरुते प्रतिपुष्पं तु स्वर्णनि
ष्काधायुतं फलं ॥२१॥ स्नानकाले तु कृष्णस्य अगरुं दहते तु यः ॥ प्रविष्टो नासिकां गंधं पापं
जन्मायुतं दहेत् ॥२२॥ स्नानकाले तु कृष्णस्य शंखवादीनां नुवादनं ॥ प्रसन्ने हरं लभे त्पुण्यं का
पिलं गोशतोद्भवं ॥२३॥ स्नानकाले तु देवस्य पठन्नामसहस्रकं ॥ कुरुते ब्रह्मलोके तु वस
ते ब्रह्मवासरं ॥२४॥ फलमेतन्महीपाल गीतायां परिकीर्त्तितं ॥ गजेंद्रमोक्षणेनापि स्तवरा

119/1964

जेनकीर्तनं॥२५॥स्तवैर्मुक्तिप्रदैरेतैःपवनैश्चनराधिप॥तेषामायातिदेवेशःसर्वान्का-
मान्प्रयछति॥२६॥किंपुनर्वेदपाठंतुस्नानकालेकरोतियः॥तस्ययद्भवतेपुण्यंनज्ञातंन-
रनायक॥२७॥स्नानकालेतुसंप्राप्तेशंखस्याग्रेतुनर्तनं॥गीतंचैवपुनर्मर्त्यैःकुंभाकृनि-
स्वनेनहि॥२८॥स्नानकालेतुशंखस्यजयशब्दंकरोतियः॥करतालनसंयुक्तंगीतंनृत्यंप्रकु-
र्वति॥२९॥उन्मत्तचेष्टांकुर्वाणोहसनजल्पनृपथेछया॥स्वकंतेनधरायांचयोनियंत्रम-
निर्गमं॥३०॥नोतानजायीनवतिमातुरंकेनरेश्वर॥गुणानुवद्यतिशंखस्यायःकलौम-
नुसंख्यया॥३१॥चंदनागरुमिश्रेणकुंकुमेनसुगंधिना॥विलेपयंतियेशंखंकर्पूरस्पृगो-
छया॥३२॥कल्पांतंतुवनेविष्णोर्वसतेपितृभिःसह॥प्रत्येकंचंदनादीनादीनामींद्रद्युम्नन ६२
चान्यथा॥३३॥नानादेशसमुद्भूतैःसुवस्त्रैश्चसुकोमलैः॥धूपयित्वासुगंधाद्यैःपरिधापय-

तिमानवाः॥मन्वंतराणिवसतेतंतुसंख्याहरेर्गृहे॥स्वशक्त्यादेवदेवेशंभूषणैर्भूषयंतिये॥

121 / 1964

हेमजैःरत्नजैःशुभ्रैःमणिजैश्चसुशोभनैः॥तेषांफलंशतानंदोनरुद्रोवासवासवादयः॥
३६॥जानंतिमुनयोनैववर्जयित्वातुमाधवं॥येर्चयंतिजगन्नाथंसशंखंकलिमल्लापहं॥३७॥के-
तकीतुलसीपत्रैःपुष्पमालातिसंभवैः॥तद्देशसंभवैश्चान्यैःकुसुमैर्भूरिनिर्दृप॥३८॥एकैकंच-
पशोशादूलदीनारशतसंमितं॥येकुर्वंतिनराःपूजांस्वशक्त्यारुक्मिणीपतेः॥३९॥क्रीडंति
देवतालोकेमन्वंतरशतानिच॥यःपुनस्तुलसीपत्रैःकोमलैःमंजरीयुतैः॥४०॥पूजयेत्सूत्रबद्धे
सुशंखेदेवकिनंदनं॥यागतियोगियुक्तानांयागतिर्यज्ञशालिनां॥४१॥यागतिर्दीनशीला-
नांयागतिस्तीर्थसेविनां॥यागतिर्मंत्रभक्तानांद्वादशीवेधवर्जितां॥४२॥कुर्वतांजागरंविष्णो-
र्दत्पतांकुर्वतांफलं॥वैष्णवानांतुभक्तानांयत्फलंवेदवादिनां॥४३॥पठतांवैष्णवंशास्त्रंवै-

ष्णवानां तु पठतां ॥ तुलसीमालया सार्द्धं पूजितं रुक्मिणीप्रियं ॥४४॥ फलमेतन्महीपाल यद्भ
वेनात्र संशयः ॥ यथा लक्ष्मीप्रिया विष्णोः तुलसी च ततोधिका ॥४५॥ द्वारकायां समुत्पन्ना
विशेषेण फलाधिका ॥ यत्र तत्र स्थितो विष्णुः तुलसीदलमालया ॥४६॥ पूजितो द्वारकापु
ण्यं समग्रं लभते कलौ ॥ ये चार्चयंति केतक्याः पत्रैः सार्द्धं कलिमलापहं ॥४७॥ फ॰ पत्रे पत्रेश्वमेधस्य
फलं यच्छंति मनुजः ॥ योर्चयेन्मालतीपुष्पैः सार्द्धं त्रिभुवनेश्वरं ॥४८॥ तेनाप्तनास्ति संदेहो मम
दं कुलं संहरेः ॥ ऋतु ऋतुकालोद्भवैः पुष्पैः योर्चयेद्रुक्मिणीपतिं ॥४९॥ सर्वान्कामानवाप्नोति दि
व्यान्भोगांश्च मानुषान् ॥ सार्द्धागुरुणा सार्द्धं ये धूपयंति कलौ नराः ॥५०॥ सकर्पूरेण राजेंद्र सार्द्ध ६३
स्याग्रे तु दीपकं ॥५१॥ पातकं सर्वमुत्सृज्य ज्योतिरूपं लभेत्पदं ॥ द्वारे सार्द्धस्य यो नित्यं दीपमालां
करोति हि ॥५२॥ सप्तद्वीपावनीराज्ञा दीपे दीपे फलं लभेत् ॥ नैवेद्यानि मनोज्ञानि सार्द्धाग्रे तु नि

वेदये ॥५४॥ कल्पांतं तत्पितृगणां तृप्तिर्भवति शाश्वती ॥ फलानि यच्छति यो वै सुहृद्यानि नरे
श्वर ॥५५॥ कल्पांतं जायते तस्य सफलाः सुमनोरथाः ॥५७॥ कल्पांतं तेन जलापेक्षाः कुर्वंति
च पितामहाः ॥ ध्वजेनाथ वस्त्रेण सुसूक्ष्मा मातरश्विनी ॥५८॥ देवदेवस्य राजेंद्र कुरुते यः समी
वारणं ॥ न कुलेयमलोके तु शामतेनारकोदधिः ॥५९॥ वायुलोकान्महीपाल पुनर्गतिर्न वि
द्यते ॥ सार्द्धवेश्मनि यः कुर्यात्सुरूपं पुष्पमंडपं ॥६०॥ सपुष्पकविमानेन क्रीडते कोटिभि
र्दिनैः ॥ चमरश्चामरवातेन सार्द्धं यस्तोषयेन्नरः ॥६१॥ तस्योत्तमांगं देवेशाः स्पृशंते स्वमुखेन
वै ॥ यः कुर्याच्चित्रसुवनं कदलीस्तंभशोभितं ॥६२॥ नंदने वाप्सरायुक्तः स्वागतं तस्य देवराट् ॥
सार्द्धालयं प्रकुरुते पताकाभिश्च शोभितं ॥६३॥ देवकन्याहृतो लक्षैः सेव्यते सुरनायकैः ॥ ध्व
जमारोपयेद्यस्तु प्रासादोपरि लक्षितः ॥६४॥ तस्य ब्रह्मपदे वासः क्रीडते ब्रह्मणा सह ॥ सांग

123/1964

णां वर्त्तिकोपेतं स्वस्तिकैश्च समन्वितं ॥६६॥ देवदेवस्य कुरुते क्रीडते भुवनत्रये ॥ यो दद्यात्
पुष्पप्रकरं मंडपे रुक्मिणीपतेः ॥६७॥ देवोद्यानेषु सर्वेषु यावत्क्रीडति भूधराः ॥ आसा-
देशस्य देवस्य चित्रकर्म करोति यः ॥६८॥ वसते रुद्रलोके तु यावत्तिष्ठंति सागराः ॥ दद्या-
द्दीपोदपेयस्तु शक्त्या परि नरेश्वरः ॥६९॥ वसते सोमलोके तु यावत्तिष्ठंति तारकाः ॥ छत्रं च
कुशासाकं तु रुद्रेरीवस्त्रगुंठितं ॥७०॥ दिव्यरत्नैश्च संयुक्तं हेमदंडसमन्वितं ॥ यः प्रयच्छ-
ति शक्त्या च च्छत्रं स्वाद्बुद्धिहतः ॥७१॥ आवृतस्त्वमरैः सर्वैः क्रीडते पितृभिः सह ॥ दद्यान्नर
विमानं तु शक्त्या च नरनायक ॥७२॥ संस्कृतो धनदेवेन वसते ब्रह्मवासरं ॥ शक्त्या सुजादि-
कं सर्वं क्षालनं शक्त्या मुदेहिनि ॥७४॥ आरात्रिकं प्रकुर्वाणो मोदते शक्त्या संनिधौ दीप्तिमंतं स ६४
कर्पूरं करोत्यारात्रिकं नृप ॥७५॥ शक्त्या वसतो लोके सप्तकल्पानि मानव ॥ शंखेन

त्वा तु पानीयं चामयेत् केशवोपरि ॥७६॥ संनिधौ वसते विष्णोः कल्पांतं क्षीरसागरे एवं 125 / 1964
ज्ञात्वा तु शक्त्या यः करोति प्रदक्षिणां ॥७६॥ पठेन्नामसहस्रं तु स्तवमन्यं पवेन्नृप ॥ सप्त-
द्वीपावती पुण्यं लभते तु पदे पदे ॥७७॥ कुर्याद्दंडनमस्कारं अश्वमेधश्रुतेः समं ॥ शक्त्या सं-
तोषयेद्यस्तु सुगीतैर्मधुरस्वरैः ॥७८॥ सामवेदफलं तस्य जायते नात्र संशयः ॥ यो नृत्यति
प्रहृष्टात्मा भावैर्बहुभक्तितः ॥७९॥ स निर्दहति पापानि मन्वंतरशतान्यपि ॥ शक्त्या श्र-
तो महाभक्त्या कुर्यात्पुस्तकवाचनं ॥८०॥ प्रत्यक्षरं लभेत्पुण्यं कपिलाशतदानजं ॥ कुर्वं-
ति तु साम गीतिवाशिभ्नं संतोषयंति ये ॥८१॥ कल्पांते ब्रह्मलोके तु वसंति द्विजोत्तमाः ॥
योगशास्त्राणि वेदांतान् योगिनः शक्त्या संनिधौ ॥८२॥ पठति रविबिंबं तु भित्त्वा यांति लयं
हरौ ॥ गीतानामसहस्रं तु स्तवराजमनुस्मृतिः ॥८३॥ गजेंद्रमोक्षणं चापि शक्त्या स्यात्तीव

वक्त्रजं॥श्रीमद्भागवतंशास्त्रंपठतेब्रह्मसंनिधौ॥८४॥कुलकोटिशतैर्युक्तःक्रीडतेयो
गिभिःसह॥यःपठेद्रामचरितंभारतंव्यासभाषितं॥८५॥पुराणानिमहीपालमुक्तिंप्रा
प्नोतिनसंशयः॥द्वादशीजागरेप्राप्तेएवंकुर्वंतियेनराः॥८६॥गीतकैःशतसाहस्रंपुण्यंप
ठितैकेशव॥जागरेकोटिगुणितंपुण्यंभवतिभूमिप॥८७॥वसतांद्वारकायांमेप्रत्यहं
जायतेफलं॥गोमतीनीरपूतानांशंखचक्रावलोकिनां॥८८॥दर्शनात्पातकंयातितेषां
वर्षशतोर्जितं॥धन्यास्तेमानुष्याःलोकेगोमत्युदधिवारिणा॥८९॥तर्पयंतिपितॄन्देवा
न्देवान्गत्वाद्वारवतींकलौ॥गंगाद्वारेप्रयागेचगंगायांकुरुजांगले॥९०॥पुष्करेचप्रभासे
चश्रीस्थलेशुक्लतीर्थके॥स्नानेनपिंडदानेनपितॄणांतर्पणेनते॥९१॥तृप्तिर्भवतिभूपाल ६५
तथागोमतिदर्शनात्॥चांद्रायणसहस्रस्यफलमाप्नोत्ययत्नतः॥९२॥धन्याद्वारवतीलो

केवहतेयत्रगोमती॥स्वयंवसतियस्यांवैब्रह्मोरुक्मिणीवल्लभः॥९३॥नस्नातागोमती १२७/१९६४
नीरेकलौपापेनमोहिताः॥भविष्यतिकथंतेषांपापबंधस्यसंक्षयं॥९४॥निर्मितात्वस्म
न्निश्रेणीकलौब्रह्मणागोमती॥महत्तमःप्रीतिजननीजंतूनांनरसत्तमः॥९५॥नेदृशंस्वर्गसो
पानंदृश्यतेगोमतीसमं॥सुखदंध्यायिनांपुंसांस्नानमात्रेणमोक्षदं॥९६॥गोमतीनीरसं
स्पृष्टोयत्रगर्जतिसागरः॥तत्रगत्वानरव्याघ्रब्रह्मस्तिष्ठतियत्रवै॥९७॥यत्रचक्रांकिताःशो
लाःगोमत्युदधिनिःसृताः॥यच्छंतिपूजितामोक्षंतांपुरींकोनसेवयेत्॥९८॥यत्रचक्रांकि
तामुद्रातिष्ठतेनिर्मलानृप॥कलौपापविनाशायतांपुरींकोनसेवयेत्॥९९॥अप्रधृष्या
पुरीलोकेदैत्यदानवरक्षसां॥शरणंदेवतादीनांतांपुरींकोनसेवयेत्॥१००॥यास्मृताकलि
कालेतुपुण्यपापस्यसंक्षयं॥ज्ञात्वायच्छतिवीर्यांतांपुरींकोनसेवयेत्॥१०१॥यजतेयांकलौ

नैव भक्तो देवकिनंदनः॥ कर्मणा मनसा वाचा तां पुरीं को न सेवयेत्॥ १२॥ श्रीमार्कंडेय उ॥ शृ
णु राजेंद्र वक्ष्यामि कथां पापप्रणाशिनीं॥ श्रुत्वा यां मुच्यते जंतुः दुःखसंसारबंधनैः॥ १३॥ अवंती
विषये पूर्वं ब्राह्मणो वेदपारगः॥ चंडशर्मेति विख्यातो शिवभक्तः सदा नृप॥ १४॥ मनसा क
र्मणा वाचा नान्यं ध्यायेद्विना शिवं॥ शैवाष्टं तान्व्रतं नान्यत् न करोति नराधिप॥ ५॥ नोपवासं ह
रिदिने कुरुते न व्रतं हरेः॥ विना चतुर्दशीं राजन् नान्यदेवसमुद्भवं॥ ६॥ यत्र यत्र शिवक्षेत्रं यत्र
तीर्थं तु शांकरं॥ तत्र गच्छति राजेंद्र वैष्णवं गच्छते न हि॥ ५॥ प्रतिवर्षं च कुरुते सोमनाथस्य दर्शनं
॥ न जहाति विशेषेण सोमपर्वे नरेश्वर॥ ६॥ एवं प्रकुर्वतस्तस्य नववर्षाणि सप्तति॥ गतानि
तस्य राजेंद्र शिवभक्तिं प्रकुर्वतः॥ ७॥ कदाचित्सोमपर्वे तु गतो सौ सोमनायकं॥ नानादेशा
न्महीपालन्नसंख्याताश्च मानवाः॥ ८॥ गताः सप्त पुरी सर्वे दृष्टा सोमेश्वरं प्रभुं॥ आगतास्ते चंड

129/1964

शर्मा निर्गतो द्वारकां पुरीं॥ ९॥ वैशाखदर्शे शुक्लाकुल्लिनास्नानसंनिधे॥ संबोधितोपि स्वजनै
र्न गतो द्वारकां पुरीं॥ १०॥ शिवक्षेत्रात्परं तीर्थं नाहं मन्ये जगत्त्रये॥ नान्यो देवो मया ज्ञातः ईश्वराद्देव
नायकात्॥ ११॥ विना वै चंडशर्माणं गतास्ते द्वारकां पुरीं॥ अन्यस्मिन्दिवसे राजन् गच्छन् स्वगृहं
प्रति॥ १२॥ वक्षस्थे दर्शनं स्वप्ने चंडशर्म पितामहः॥ प्रेतरूपा महाघोरा स्तुल्का मातीव भीषणाः॥ १३
॥ दृष्ट्वा स्वप्ने महारौद्रान् नीता सो चत्रकं पितः॥ चंडशर्मोवाच॥ के यूयं विकृताकारा नग्नरूपा मया
वहाः॥ १४॥ पृथ्वीसमुद्भवा जीवाः न दृष्टा न श्रुता मया॥ प्रेता ऊचुः॥ मा त्वं यं कुरु विप्रेंद्र तव पूर्वपि
तामहाः॥ १५॥ आमातामहसमीपेत महता दुःखपीडिताः॥ चंडशर्मोवाच॥ इष्टं दत्तं तपस्तप्तं न वह्नि
र्मत्पितामहैः॥ १६॥ प्रेतत्वे कारणं किं स्यान्न जानतां विस्मयो मम॥ प्रेता ऊचुः॥ शृणु पुत्र प्रवक्ष्या
मि प्रेतयोनेस्तु कारणं॥ १७॥ वासरं वासुदेवस्य सदा विद्वेषितं पुरा॥ प्रेतत्वं तेन संप्राप्तामस्माभिः

शृणु पुत्र प्रवक्ष्यामि प्रेतयोनेस्तु कारणं ॥१७॥ वासरं वासुदेवस्य सदा विद्धं कृतं पुरा ॥ प्रेतत्वं
तेन संप्राप्तास्मानि शृणु पुत्रक ॥१८॥ विशेषेण कृतं रात्रौ सविद्धं जागरं हरेः ॥ पतन नरके घो
रे न विष्यति न संशयः ॥१९॥ न कृता केशवे भक्तिर्न कृतं वासरं हरेः ॥ पतनं नरके घोरे न विष्य
ति न संशयः ॥२०॥ त्वया मह न संदेहो यावदाकृतसंप्लवं ॥ चंडशर्मोवाच ॥ संतोषितो मया देवो भ
क्त्या त्रिपुरनाशनः ॥२१॥ प्रदास्यति गतिं ऋल्लं प्रेतत्वं नाशयिष्यति ॥ प्रेता ऊचुः ॥ हरिभक्तिवि
हीनानां द्वादशीव्रतवर्जितां ॥२२॥ नाशं नायाति प्रेतत्वं पूजितैः शंकरादिभिः ॥ प्रायश्चित्तीभ
दा पुत्र पूज्यमाने पिशांकरे ॥२३॥ विना केशवपूजायां पापं भवति गोवधं ॥ प्रथमं केशवे पूजा प ६७
श्चा देवो महेश्वरः ॥२४॥ पूजनीयो महाभक्त्या ये चान्ये संति देवताः ॥ मूलान्वशाखा प्रशाखाश्च भ
वंति बहुशः सुत ॥२५॥ वासुदेवात्समुद्भूतं जगदेतच्चराचरं ॥ तस्मान्मूलं परित्यज्य शाखां नैवार्चये

131/1964

द्बुधः ॥२६॥ विशेषेण जगन्नाथं त्रैलोक्याधिपतिं हरिं ॥ न हि ते ये प्रकुर्वंति सम्यक्दैवज्ञशोधितं ॥
२७॥ सम सत्यं तेन संदेहो ह्येतत्वं याति पुत्रक ॥ न पूजा रक्षते शैवी नास्करी न पितामही ॥२८॥ प्रेत
त्वं ये च कुर्वंति सशल्यं वासरं हरेः ॥ पूर्णमासीद्वयं प्राप्ते राकामग्निविवर्जितां ॥२९॥ विशेषेणानुवे
शाखी शूद्रादीनां प्रशस्यते ॥ वेशाषे तु ह्वतीयायां पूर्वविद्धां करोति यः ॥३०॥ हव्यं देवा न गृह्णंति क
व्यं चैव पितामहाः ॥ यत्र देवा न गृह्णाति कथं तत्र पितामहाः ॥३१॥ तस्मान्न कार्या हि द्वितीया पूर्वविद्धा
बुधैरपि ॥ कुरुते यदि मोहाद्वा प्रेतत्वं शाश्वतं सुत ॥३२॥ नापयाति ह्यतैः पुण्यैः बहुभिस्तीर्थसेवि
तैः ॥ दर्शाश्च पूर्णमासी च पित्रोः संवत्सरदिनं ॥३३॥ पूर्वविद्धां प्रकुर्वाणो नरकं प्रतिपद्यते ॥ द
र्शश्च पूर्णमासी च साग्निकैः ॥ पूर्वसंयुता ॥३४॥ कर्तव्या नाग्निहीनैस्तु मनुराह प्रजापतिः ॥ ह्यास्यादे
व पुनः प्रोक्तान्त कालव्यापिनी तिथिः ॥३५॥ श्राद्धं तत्र प्रकर्तव्यं ह्यसद्दार्धचकारणं ॥ एतैः प्रकारैः

प्रेतत्वं न व्रजंति प्राणिनां तु वि॥३६॥ निरीक्ष्य धर्मशास्त्राणि कार्यं विहितमात्मनः॥ था यथोक्तं मनु
ना पुत्र वेदांतेर्नापि कारकैः॥३७॥ तस्मात्प्राणां प्रकर्तव्यं प्रेतत्वं न भवेद्यथा॥ प्राणस्य सोमनाथं तु या
त्रां कृत्वा न गच्छति॥३८॥ तस्य दर्शनार्थाय तस्य किं भवते फलं॥ कथ्यते परमामूर्तिर्हरिरीश्व
र संज्ञता॥३९॥ विभेदो नात्र कर्तव्यो यथा ब्रह्मा तु तथा हरिः॥४०॥ तस्य सोमनाथस्य नीलरंध्रप
ते क्वचित्॥ यात्रां श्री सोमनाथस्य संपूर्णां तस्य दर्शनात्॥४१॥ तस्मात् उत्पतः पुत्र गंतव्यं नात्र
संशयः॥ दृष्ट्वा सोमेश्वरं देवं गंतव्यं द्वारकापुरी॥४२॥ प्रभासे सोमनाथस्य संस्थलिंग मध्ये व्यवस्थि
तो॥ स्वयं तिष्ठति विश्वात्मा भोगं गृह्णाति केशवः॥४३॥ दृष्ट्वा सोमेश्वरं देवं द्वारकां नैव गच्छति॥
पतनं नरके घोरे पितृः सह गमिष्यति॥४४॥ विशेषेण त्वया वत्स नत्तं द्वादशी व्रतं॥ व्रतं नत्तं ६८
दस्मात्तिः॥ न कृतं वेध संयुतं॥४५॥ निर्गमिंय मलोकाश्च नदास्माकं न दृश्यते॥ चंडशर्मोवाच॥ य

दि तात मया ज्ञानान् नत्तं द्वादशी व्रतं॥४६॥ तस्मात्कृतं मया त्वं च न बद्धि द्वादशीव्रतं॥४६ 133/1964
॥प्रेता ऊचुः॥ कुविप्रैस्तु कुदैवज्ञैः शुक्र माया विमोहितैः॥४७॥ कारापिता हैतुकैश्च प्रेतयोनि नि
मि मां गताः॥ दत्तं तत्पंकुतं दत्तं अस्माकं विफलीकृतं॥४८॥ संप्राप्य प्रेतयोनित्तु मशाल्माद्वादशीव्र
तात्॥ मवेधये प्रकुर्वंति वा सरं केशव प्रियं॥४९॥ तेषां पितामहास्वर्गात् प्रेतत्वं यांति पुत्रक॥ चंड
शर्मोवाच॥ प्रेतत्वं नाश मायांति कथयं तु पितामहाः॥५०॥ कर्मणा केन तत्पश्चात् अहं प्रकरोमि तत्॥
प्रेता ऊचुः॥ मागयां माभयागे तु पुष्करे कुरुजांगले॥५५॥ श्रीबाह केवनावंतां मथुरायां तथा
र्बुदे॥ तथान्यतीर्थ लक्षेतु वर्जयित्वा तु गोमतीं॥ नीरदानेन गोमत्यां लक्ष्मवक्त्रावलोकने॥
प्रेतत्वनाशमायांति तत्पिष्टरुणां कलौयुगे॥५६॥ प्रेतत्वं वर्जितानां च गोमतीनीरदानतः॥ वि
ना पिंडप्रदानाद्य मुक्तिर्भवति शाश्वती॥५७॥ दृष्टे लक्ष्म मुखे पुत्र दशमी वेध संभवं॥ पापं प्रणा

शयमप्येति पुनर्न करुते यदि॥५८॥ गोमतीनीरसंपर्कात् लक्ष्मवक्त्रावलोकनात्॥ विलयं यां
ति पापानि जन्मकोटिकृतान्यपि॥५९॥ हत्या संन्यासिनां पुण्यं हृत्वा च वनवांवासिसिनां
॥ स्वभार्य्यं वा परं विष्णोः करुते यदि पुत्रक॥६०॥ तस्मात्कृष्णमुखं पश्य पुण्यचिंह समप्रभं॥ ल
क्ष्मस्य द्वारकां गत्वा पुण्याय धाम्ना कृतार्तिर्नवेत्॥६१॥ विफलं तव संजातं पुण्यं तं यत्त्वपार्जितं॥ न
स्नातं वा परं विष्णोर्न स्नातं केशवार्चनं॥६२॥ यत्त्वया सर्वतीर्थेषु गत्वा पुण्यमुपार्जितं॥ तत्सर्वं वि
फलं जातं विना केशव वासरात्॥६३॥ विना केशवपूजायां शंकरोपत्वयार्चितः॥ तत्पुण्यं विफलं
जातं प्रेतयोनिं गमिष्यसि॥६४॥ संपूर्णं तव पुण्यं तु द्वारका लक्ष्मदर्शनात्॥ न विद्यति न संदेहो गो
मत्युदधिसंगमे॥६५॥ दृष्ट्वा सोमेश्वरं देवं लक्ष्मं यदि न पश्यति॥ यात्राफलं न वाप्नोति वदत्येवं स्वयं ६९
शिवः॥६६॥ दृष्टोहं तेन संदेहो यः कृतं लक्ष्मदर्शनं॥ एतन्मत्तिनि संदेहो मम लक्ष्मस्य नांतरं॥६७॥ दृष्ट्वा

मां द्वारकां गत्वा कृत्स्नं लक्ष्मदर्शनं॥ दृष्ट्वा लक्ष्मं तु मां पश्येत् यात्रा तीव महाफला॥६८॥ लक्ष्मदर्श 135/1964
न पूता ये मां पश्यंति मानवाः॥ न तेषां पुनरावृत्तिर्मम लोकाच्च वैष्णवात्॥६९॥ इत्याह देवदे
वेशो स्वयं भूः सोमपतिः॥ पुरा॥ विप्राणां शृतमस्माभिः वदतां पुष्करे सुत॥७०॥ तस्माद्यात्राप्रमा
णार्थं कुरुते लक्ष्मदर्शनं॥ अन्यथा यास्यसे योनिं पैशाचीं यावमेदिनी॥७१॥ स्नात्वा परात्क्षेपि य
द्याकुरुते लक्ष्मदर्शनं॥ मुच्यते नात्र संदेहो पापैर्जन्मायुतार्जितैः॥७२॥ पूजिते देवदेवेशे लक्ष्मे देव
किनंदने॥ पूजितो देवताः सर्वे ब्रह्मरुद्रनगादिकाः॥७३॥ विना लक्ष्मस्य पूजायां रुद्राद्या स्त्रिदिवौ
कसः॥ पूजिता नैव कुर्वंति तुष्टिं पितामहा॥७४॥ तस्मात्द्वारवती गत्वा कुरुते लक्ष्मदर्शनं॥ प्रेत
योनिं विनिर्मुक्ताः यास्यामि परमां गतिं॥७५॥ गोमतीनीरधूतानि यस्यांगानि कलौ युगे॥ न पुन
र्योनिमाप्नोति दृष्टं मुनिभिरेव च॥७६॥ ताडिता पादयुग्मेन गोमतीनीरविप्रुषः॥ अगतीनां

प्रकुर्वंति गतिं वैकुंठस्य चाक्षरं॥७७॥यः पुनः कुरुते श्राद्धं गोमत्युदधिसंगमे॥पितृणां जायते
तृप्तियावदाभूतसंप्लवगाश्रागतीवं॥७८॥ससागरेषु गंगायां सर्वतीर्थेषु यत्फलं॥वासरे
केनतत्पुण्यं द्वारकां लक्षसंनिधौ॥७९॥यत्फलं त्रिदिशे दृष्टेः सर्वतीर्थसमुद्भवैः॥तत्फलं
लभते सर्वं द्वारकां लक्षसंनिधौ॥८०॥तीर्थकोटिसहस्रेस्तु यत्फलं पितृतर्पणे॥तत्फलं लभ
ते भूप गोमतीतीरदर्शनात्॥८१॥यतीनां भोजने यत्तु पुण्यं तेलक्षसंनिधौ॥सिद्धे सिद्धे त्वृषि
ःपितृणां युगसंख्यया॥८२॥कौपीनाछादनं वस्त्रं पादुकां च कमंडलुं॥दत्वा संन्यासिनां याति
सप्तकल्पानि तत्पदं॥८३॥धन्यास्ते मानवाः पुत्र वसंति श्वपचादयः॥द्वारकायां गतिं यांति वै ७०
यां तिर्यग्योगिनः॥८४॥त्रिकालं ये प्रपश्यंति मुखं लक्षस्य नित्यशः॥न तेषां पुनरावृत्तिः कल्पको
टिशतैरपि॥८५॥या नारी विधवा भूत्वा कुरुते द्वारकाश्रयं॥कुलेषु तत्सहस्रेषु नयते परमं प

दं॥८६॥पुत्रैर्णापीह किं येन गतो द्वारकां पुरीं॥नारी पुत्रशतात् श्रेष्ठा धन्या लक्षपुरी वसेत्॥
८७॥लक्षं लक्षपुरीं गत्वा योऽर्चयित्तुलसीदलैः॥ग्रासं जन्मफलं तेन तारिता मह॥८८॥तुल
सीदलमालां तु लक्षस्योत्तीर्णां तु यो वहेत्॥पत्रे पत्रेश्वमेधानां लभते फलमुत्तमं॥८९॥निवे
द्य केशवे मालां तुलसीकाष्ठसंभवां॥वहते यो नरो भक्त्या तस्य नैवास्ति पातकं॥९०॥तुलसी
काष्ठसंभूतां यो मालां वहते नरः॥फलं यच्छति दैत्यारिः प्रत्यहं द्वारकोद्भवं॥९१॥सदा प्रीतम
नास्तस्य लक्ष्मीदेवकिनंदन॥तुलसीकाष्ठसंभूतां यो मालां वहते नरः॥९२॥प्रायश्चित्तं न त
स्यास्ति नाशौचं तस्य विग्रहे॥तुलसीकाष्ठमालायां भूषितः पुण्यमाचरेत्॥९३॥तुलसीका
ष्ठसंभूतं शिरसा बाहुभूषणं॥भवते यस्य मर्त्यस्य देहे तस्य सदा हरिः॥९४॥तुलसीकाष्ठ
मालायां भूषितः पुण्यमाचरेत्॥पितृणां देवतानां च कृतं कोटिगुणं कलौ॥९५॥तुलसीका

137 / 1964

ष्टमालांतुप्रेतराजस्यहरकाः॥दृष्ट्वानपश्यंतिहरेणावातोहूतंयथादलं॥१९६॥तुलसीका
ष्ठंगृहेयस्यस्तत्रकंपत्रमथापिवा॥नवर्ततेतद्गृहेनैवपापसंक्रमणंकुतः॥१९७॥स्कंदपुराणे
रस्यातिःकथितंब्रह्मवादिभिः॥तस्मान्मालात्वयाधार्यतुलसीकाष्ठसंभवा॥१९८॥हर
तेनात्रसंदेहोऐहिकामुष्मिकंतपं॥ब्राह्मणाधीयतेनैवतक्षेनक्तिःसुनिश्चला॥१९९॥तुल
सीकाष्ठमालाभिःभूषितोभ्रमतेयदि॥दुःस्वप्नंदुर्निमित्तंचनभयंशात्रवःक्वचित्॥२००॥सदा
वैतीर्थसंन्यासंयतिर्वैरूपोथवास्त्रियः॥जीवन्मुक्तःकलौज्ञेयःकुलकोटिसमन्वितः॥२०१॥
धारयंतिनयेमालांहैतुकाःपापमोहिताः॥नरकान्ननिवर्तंतेदग्धाःकोपाग्निनाहरेः॥२०२ ७१
॥उन्मीलनीसंज्ञलीचत्रिस्पृशापक्षवर्धिनी॥तथापुत्रप्रकर्त्तव्याजयंतीविजयाजया॥२०३॥
पापघ्नीचाष्टमीप्रोक्तासत्यस्यातीववल्लभा॥एताःकलियुगेपुत्रधारकापुण्यदायिनी॥२०४॥

॥इतिश्रीस्कांदोक्तसंहितायांश्रीद्वारकामाहात्म्येचंद्रशर्मोपाख्यानंनामाऽध्यायः॥२२॥छ॥
श्रीमार्कंडेयउ॥पितॄणांप्रेतरूपाणांकृत्वाकर्ममहीपते॥चंद्रशर्माद्विजश्रेष्ठोद्वारकांसमुपा
गतः॥१॥रुक्मिणीसहितःकृष्णोयत्रतिष्ठतिसस्पृहं॥यत्रतिष्ठंतितीर्थानितस्यायातोद्विजोत्त
मः॥२॥यत्रतिष्ठंतियज्ञाश्चयत्रतिष्ठंतिदेवताः॥यत्रतिष्ठंतिऋषयोयोगिनोयोगवित्तमाः॥
३॥यापुरीसिद्धगंधर्वैःसेव्यतेकिंनरैर्नरैः॥अप्सरोगणगंधर्वैर्द्वारकासर्वकामदा॥४॥स्वर्गा
रोहणनिःश्रेणीवहतेयत्रगोमती॥सापुरीमोक्षदाकृष्णप्रविष्टाप्रवरेणहि॥४॥यस्याःसीमां
प्रविष्टस्यब्रह्महत्यादिपातकाः॥तद्रूपंलिदर्शनादेवतांपुरींकोनसेवयेत्॥५॥गोमतीसहितो
नित्यंक्रीडतेयत्रसागरः॥चंद्रशर्मागतस्तत्रयत्रतिष्ठतियत्रवै॥७॥गत्वारद्वारवतींपुण्यां
मुदंप्राप्तोद्विजोत्तमः॥नत्वातत्रपुरींचैवगोमतींचैवसागरं॥८॥मन्येनतार्थमात्मानंजीवितं

139/1964

यौवनं॥ दृष्ट्वा त्वत्पुरीं रम्यां त्वन्मुखपंकजं॥ ९॥ धन्योहं तु त्वत्तलोहं संप्राप्तोहं धरातले॥
दृष्ट्वा त्वन्मुखं पुण्यं रुक्मिणीं द्वारकां पुरीं॥ १०॥ तीर्थकोटिसहस्रैस्तु सेवितैः किं प्रयोजनं॥ पु
ण्यं लक्षसहस्रैस्तु प्राप्ता द्वारवती मया॥ ११॥ श्रुत्वा वैशाखमासे च संप्राप्ते मधुसूदनी॥ द्वादशी
त्रिस्पृशा नाम पापकोटिक्षयावहा॥ १२॥ धन्या सर्वे मनुष्यास्ते वैशाखे मधुसूदनीं॥ संप्राप्ता त्रि
स्पृशा ये तु बुधवारेण संयुता॥ १३॥ नपश्येद्दीनलक्षैस्तु न वेदैस्तीर्थसेवनैः॥ प्राप्यते तं फलं वै
वयादृशं द्वारकान्तरं॥ १४॥ एवमुक्त्वा द्विजश्रेष्ठो गोमतीतटमाश्रितः॥ उपस्पृश्य यथान्या
यं शास्त्रदृष्टेन कर्मणा॥ १५॥ कृत्वा स्नानं यथोक्तं तु संतर्प्य पितृदेवताः॥ चक्रतीर्थात् समा
दाय शिला चक्रांकिता शुभा॥ १६॥ पूजिता पुरुषसूक्तेन यथोक्तविधिना नृप॥ शिवनक्तिन ७२
ता पश्चात् पितृवाक्यमनुस्मरन्॥ १७॥ दत्वा पिंडोदकं सम्यक् पितॄणां विधिपूर्वकं॥ ततं स्व

शास्त्रविधिना क्षीरादिस्नपनं नृप॥ १८॥ विलेपनं च वस्त्राणि पूजां दीपं स धूपकं॥ नैवेद्यानि मनो 141/1964
ज्ञानि कंदमूलफलानि च॥ १९॥ तांबूलं च सकर्पूरं सक्षौत्तानी राजनादिकं॥ प्रदक्षिणं नम
स्कारं स्तुतिपूर्वं पुनः पुनः॥ २०॥ क्षमापयित्वा देवेशं चक्रे जागरणं ततः॥ यामत्रये व्यतीते
चखंडग्राम उवाच ह॥ २१॥ आतुरस्य च दीनस्य शृणु त्वं च वचो मम॥ संसारार्णवमग्नानां त्वमे
व शरणं नृणां॥ २२॥ त्वत्पदांबुजसंसक्तानां न दुःखं पापिनामपि॥ किं तु नः पापहीनानां द्वा
दशीसेविनां नृणां॥ २३॥ दशमीवेधजं पापं तद्दिने मत्पूर्वजैः॥ यत्कृतं नरो मायात्वलवणं तु
यथा नसि॥ २४॥ सविद्धवासरं यस्मात् कृतं मत्पितामहैः॥ प्रेतत्वं तेन संप्राप्तं महादुःखप्रदाय
कं॥ २५॥ यथा प्रेतत्वनिर्मुक्ता मम पूर्वपितामहाः॥ मुक्तिं प्रयांति देवेश तथा कुरु जगत्पते॥
॥ श्रवणक्षितता नैव न कृतं तव वासरं॥ २६॥ न दृष्टा द्वारका त्वक्ष न स्नातो गोमतीजले॥ न दृष्ट

।।२६।।पुनरेवं यदुश्रेष्ठ प्रसादं कर्तुमर्हसि।। अविद्यामोहितेनापि न स्तुतं तव पूजनं ।।२७
।।मया पापेन देवेश शिवभक्तिसमाश्रिता।। तव भक्तिस्तता नैव न स्तुतं तव वासरं ।।२८
।।न दृष्टा द्वारका सम्यक् न स्नातो गोमतीजले।। न दृष्टं पादपद्मं च त्वदीयं मोक्षदायकं ।।३०।।
न स्तुता द्वारका यत्र दृष्टा सोमेश्वरं प्रभुं। विफलं सुकृतं जातं।। यन्मया समुपार्जितं।।३१।।म
त्पूर्वैस्तु कथितं सर्वमेतत्सुरेश्वर।। तत्पुण्यं मा वृथा पापात्प्रमादात्तव केशव।।३२।।दृष्टेनु तव व
क्त्रेउदुर्लभं तु वनत्रये।। नैवास्ति देवकीपुत्र पुराणैः सुश्रुतं तथा।।३३।।सापराधस्तु ये केचित्
शिशुपालादयस्मृताः।। त्वच्चक्रेण हताः कोपात् मुक्तिं प्राप्ता महीधर।।३४।। अद्यप्रभृति कर्त्तव्यं
यन्मया तच्छृणु।। एकादश्यां न भोक्तव्यं कर्त्तव्यं जागरं सदा।।३५।।महाभक्त्या च कर्त्तव्या प्र ७३
त्यहं पूजनं तव।। फलाद्येनापि विष्णो स्मात् मोक्तव्यं वासरं तव।।३६।।तत्प्रिया षष्ठी मम माकार्या द्वादशी

व्रतसंयुता।। भक्तिभागवती कार्या प्राणैरपि धनैरपि।।३७।। नित्यं नाम सहस्रं तु पठनीयं तव 145/1962
प्रियं।। पूजा तुलसिपत्रैस्तु मया कार्या सदैव हि।।३८।। तुलसीकाष्ठसंभूता माला धार्या सदा म
या।। नृत्यं गीतं तु कर्त्तव्यं संप्राप्ते तव जागरे।।३९।। तुलसीकाष्ठसं।। भूतं चंदनेन विलेपनं।।क
रिष्यामि तवाग्रे तु गुणानां तव कीर्तनं।।४०।।द्वारकायां प्रकर्त्तव्यं प्रत्यब्दागमनं मया।। त्वत्कथा
श्रवणं कार्यं नित्यं पुस्तकवाचनं।।४१।।नित्यं पादोदकं मूर्ध्नि मया धार्यं सुभक्तितः।। नैवेद्य भ
क्षणं चैव करिष्यामि यतव्रतः।।४२।।निर्माल्यं शिरसा धार्यं त्वदीयं मागरं मया।। दत्वा तव प
दिष्टं तु भक्षणीयं सदा मया।।४३।।तथा तथा प्रकर्त्तव्यं तव तुष्टिः प्रजायते।। सत्यमेतन्मया प्र
भुः तवाग्रे परिकीर्तितं।।४४।।श्रीभगवानुवाच।। साधु साधु महाभाग चंडशर्मन्द्विजोत्तम।। तुष्टोहं
तव भक्त्या च वांछितं ते भविष्यति।।४५।।त्वयोक्तेनियमैर्वत्स संतुष्टोहं द्विजोत्तम।। आगमिष्य

तिमहंल्लोके त्वया सह पितामहाः॥४६॥ पश्यपश्येत त्वं निर्मुक्तालतूदृष्ट्वा मत्प्रसादतः॥ आका
शेगरुडारूढास्तवपूर्वपितामहाः॥४७॥ पितामहऊचुः॥ त्वत्प्रसादेन सत्पुत्रमुक्तिं प्राप्ता
न संशयः॥ प्रेतयोनिविनिर्मुक्ता यास्यामि परमां गतिं॥४८॥ गोमतीनीरदानेन पिंडदाने
न पुत्रक॥ प्रेतयोनिविनिर्मुक्तास्तव कृष्णावलोकनात्॥४९॥ ते धन्या मानुषे लोके पुत्रपौ
त्रप्रपौत्रकाः॥ दृष्ट्वा श्रीसोमनाथं तु पश्यन्ति द्वारकां हरिं॥५०॥ धन्या वै विधवा नारी कृष्णया
त्रां करोति यः॥ विना ध्यानेन लोकेस्मिन्कुलानां तारयेद्ध्रुवं॥५१॥ श्वपचोपि करोत्येवं या
त्रां यां हरिशंकरं॥ सयाति परमां मुक्तिं पितृभिः परिवारितः॥५२॥ पःपुनस्तीर्थं संप्राप्य सं
स्नात्वा तिष्ठति यत्र वै॥ विष्णुलोके गतिस्तस्य कल्पकोटिशतं॥५३॥ वंचितास्तेन संदेहो दृष्ट्वा ७४
सोमेश्वरं प्रभुं॥ दृष्टं कृष्णमुखं नैव न स्नातो गोमती जले॥५४॥ किं जातैर्बहुभिः पुत्रैस्तीर्थ

कोटिसमुद्भवैः॥ न स्नातो गोमतीनीरे दृष्ट्वा सोमेश्वरं प्रभुं॥५५॥ दृष्ट्वा सोमेश्वरं देवं द्वारकां ने
व गच्छति॥ धिक्कुलं तं सुतं पापं पितरो दिवि संस्थिताः॥५६॥ दृष्ट्वा सोमेश्वरं देवं कृष्णं चैव न प
श्यति॥ सोपि शोकान्वितं पुण्यं यात्राशं समुद्भवं॥५७॥ दृष्ट्वा सोमेश्वरं देवं कृष्णं दृष्ट्वा सोमेपुनः
शिवं॥ सोहं चर्यागतं तस्य सर्वं सांसारिकं फलं॥५८॥ अनागत्वा प्रजा सेतु कृष्णं पश्यति येन
राः॥ प्रजा सत्क्षेत्रसंजं तु फलमाप्नोत्ययत्नतः॥५९॥ यस्मात्सर्वाणि तीर्थानि सर्वदेवास्तथा
मखाः॥ द्वारकायां समायांति त्रिकालं कृष्णसंनिधौ॥६०॥ तीर्थैर्नानाविधैः पुत्र समस्थागम
नेन हि॥ फलं समस्ततीर्थानां दृष्ट्वा द्वारवतीं लभेत्॥६१॥ हते कांसे जरासंधे नरके च निपाति
ते॥ उद्धारितो भुवो भारः कृष्णो देवकिनंदन॥६२॥ चकार द्वारकां रम्यां संनिधौ सागरस्य च॥ स्थि
तः श्रीमन्नाः कृष्णो निर्मितो कामिनी सुखं॥६३॥ ब्रह्मा शिवश्च सूर्यश्च वासवाद्या दिवौकसः॥

145/1964

मर्त्यविप्राश्च राजानः पातालात्पन्नगेश्वराः ॥६४॥ नद्यो नदाश्च शैलाश्च वनान्युपवनानि च ॥
पुरीग्रामाणि रम्याणि सागराश्च सरांसि च ॥६५॥ यक्षाश्च गणगंधर्वाः सिद्धविद्याधरास्तथा ॥ रं
भाद्याप्सरसश्चैव शक्राद्या दितेःसुताः ॥६६॥ रक्षोविभीषणाद्याश्च धनदो यक्षनायकः ॥
सप्तर्षयो मुनयः सिद्धाः सनकाद्याश्च योगिनः ॥६७॥ ग्रहा ऋक्षाणि योगाश्च ध्रुवः परमवैष्ण
वः परमवैष्णवः ॥ यत्किंचित्त्रिषु लोकेषु स्थावरे जंगमेषु च ॥६८॥ श्रीसप्तसंनिधौ नित्यं ति
ष्ठते प्रत्यहं तथा ॥ न त्यजंति पुरीं पुण्यां द्वारकां सप्तसेवितां ॥६९॥ तीर्थे तीर्थे फलं प्रोक्तं
देवमृषिसंभवं ॥ सर्वतीर्थफलावाप्तिर्यत्तेन सप्तसेविता ॥७०॥ मालया सेविता पुत्र सांप्रतं
प्रेतदर्शनात् ॥ पिशाचयोनिनिर्मुक्ता यास्यामः परमां गतिं ॥७१॥ द्वादशीवेधजं पापं द्वारका ७५
याः प्रभावतः ॥ नष्टं पुत्र न संदेहः संप्राप्तं परमं पदं ॥७२॥ द्वादशीलोपसंभूतं यत्त्वया पापमर्जि

तं ॥ सप्तस्य दर्शने क्षीणं न जह्यात् द्वादशीव्रतं ॥७३॥ रक्षणीयं प्रयत्नेन वेधं दशमिसंभवं
॥ नो चेत्पुत्र न संदेहः प्रेतयोनिं गमिष्यसि ॥७४॥ त्रैलोक्यसंभवं पापं तेषां भवति भूतले ॥ स
शल्यं ये प्रकुर्वंति वासरं सप्तसंज्ञिकं ॥७५॥ प्रायश्चित्तं न तस्यास्ति सशल्यं वासरं हरेः ॥ ये कु
र्वंति न तेषां स्थितिर्मन्वंतरशतैर्द्दिवि ॥७६॥ प्रेतत्वं दुःसहं पुत्र दुःसहा यमयातना ॥ तस्मात्पुत्र न
कर्तव्यं सशल्यं द्वादशीव्रतं ॥७७॥ कारयंति च ये लग्नाः कूटयुक्ताश्च हैतुकाः ॥ प्रेतयोनिं प्रया
स्यंति पितृभिः सह नान्यथा ॥७८॥ द्वादशी दशमीविद्धा धनसंताननाशिनी ॥ धर्मघ्नी पूर्वपुण्या
नां सप्तभक्तिप्रनाशिनी ॥७९॥ स्वस्ति तेऽस्तु गमिष्यामः प्रासादाद्रुक्मिणी ॥ प्राप्तं विष्णुपदं त
त्त्वं पुनर्भवि संज्ञिकं ॥८०॥ श्रीसप्त उ ॥ वंशनाम निप्रमन्नोहं तव न स्याविदितो मम ॥ शैवं भावं
परित्यज्य त्वं जातोऽसि वैष्णवः ॥८१॥ नवसप्ततिवर्षाणि नष्टं वासरं मम ॥ संपूर्णं मत्प्रसादेन

147/1964

तवज्ञातंनसंशयः॥८२॥एकेनैवोपवासेनत्रिस्पृशासंभवेनहि॥अविद्यामोहितेनैवास्त्रि
वन्नक्रिमर्मार्चितं॥८३॥नन्नतंमत्प्रसादेनत्रिस्पृशासंभवेनहि॥वैशाखेयैरहंदृष्टोद्वारकां॥
द्विजसत्तम॥८४॥त्रिस्पृशावासरेचैववंजुलीवासरेतथा॥उन्मीलिनीदिनेप्राप्तेपक्षप्राप्तेवा
पक्षवर्द्धिनी॥८५॥नैवतस्यापराधोस्तियद्यपिब्रह्महाभवेत्॥जन्मप्रभृतिपुण्यस्ययत्कृत
तस्यापिनृसुर॥८६॥मत्पुरीदर्शनेनापिफलभागीभवेन्नरः॥८७॥दृष्ट्वासमस्ततीर्थानिप्र
ज्ञासादीनिभूतले॥मत्पुरीदर्शनेदृष्टानीहनवंस्तुतः॥८८॥नकलौफलदावेदानानिमखा
स्तपः॥पुरीद्वारवतीमुक्त्वातथैवमथवामरं॥९०॥ममाग्निजागरंपत्युगृहेवायत्रतत्रवा॥पव
तोमत्पुरीपुण्यंजनतेमत्प्रसादतः॥९१॥माहात्म्यंद्वारकायास्तुमद्दिनेयत्रतत्रवा॥कलौक ७६
रोतिपुराणानांसमस्तानांलभेत्फलं॥९२॥मत्पुरीवसतांपुण्यंत्रिकालंममदर्शनात्॥तस्फ

लंसमवाप्नोतियस्त्विदंपठतेकलौ॥९३॥कलौकाशीचमधुराद्यवंतीचद्विजोत्तमः॥अयो
ध्याचतथामायाकांतीचैवमत्पुरी॥९४॥शालग्रामंतवंचैवबदरीचतथागया॥कुरुक्षेत्रं
गुरुक्षेत्रंपुष्करंश्रुक्रसंज्ञिकं॥९५॥प्रयागंचप्रभासंचक्षेत्रंवैहाटकेश्वरं॥गंगाद्वारंसोकरं
चगंगासागरसंगमं॥९६॥नैमिषंदंडिकारण्यंतथावृंदावनंद्विजः॥सैंधवंचार्बुदारण्यंम
वीणापतनानिच॥९७॥वनानिमागधश्रदीनिउषराणिद्विजोत्तमः॥मैलराजादयःशैलाहिमा
द्रिस्थावराद्दिये॥९३॥गंगाद्यश्चसरितोभूतलेसंतियानिवै॥तीर्थानित्रिषुलोकेषुपुरीद्वा
रवतीसमः॥९४॥कलिनाकालितंसर्वंवर्जयित्वातुमत्पुरी॥नतेकलिवशंयांतिद्वारकांनिव
संतिये॥९५॥व्याप्तंपापंडिभिःसर्वंवर्जयित्वातुमत्पुरी॥नतेकलिवशंयांतिद्वारकांनिवसं
तिये॥९६॥व्याप्तंपाषंडिभिःसर्वंवर्जयित्वातुमत्पुरी॥तस्मात्कलियुगेप्राप्तेसेवनीयाम

149/1964

हापुरी॥९६॥विप्रवर्षशतेप्राप्तेमत्पुरीमसदर्शिनी॥संन्यासग्रहणोमृत्युमत्प्रसादाद्भविष्य
ति॥९७॥त्रिसहस्रावासरेप्राप्तेवैशाखेशुक्लपक्षतः॥संयुगेबुधवारस्यदिवान्हेसौमसाग्रत
॥९८॥दशसहस्रमासद्यतवप्राणस्यनिर्गमं॥भविष्यतिनसंदेहोमत्प्रसादेनसुव्रत॥९९
॥स्वंस्थानंगछविप्रेंद्रसर्वान्कामानवाप्स्यसि॥मद्भक्तानांयुगांतेपिविनाशोनोपपद्यते॥१
॥१००॥मद्भक्तिंवहतांपुंसांइहलोकेपरेपिवा॥नास्त्यन्नंविद्यतेकिंचित्कुलकोटिंनयेद्दिवं॥
१०१॥अन्यदेवंप्रपन्नानांगमागमपरिश्रमः॥बकुल्केशंकरंडःखंजायतेचपुनःपुनः॥२॥म
द्भक्तिभाविनांलोकेगमागमपरिश्रमं॥जायतेनैवमस्त्यानांमद्दिनोपासिकुर्वतां॥३॥पुण्यंमु
संचितंपातिकल्पकोटिशतैरपिक्षितिं॥सशल्यंयेप्रकुर्वंतिमुक्तिदंससवासरं॥४॥इत्युक्त्वा ७७
नगवान्विष्णुर्लक्ष्मीचक्रेप्रतापवान्॥दृष्ट्वासर्वजनैःसर्वैर्नक्षत्रानमितकंधरैः॥नमस्कृतो

विनीतोध्यातःसंस्तुतोगीतनर्तनैः॥ताषितःपरयाभक्त्यादेवकीनंदनोहरिः॥वेचंद्रशर्मापि
हृष्टात्मात्राणस्यचमुहुर्मुहुः॥स्तवैःसंतोषयामाससहस्रास्त्रादिकैःशुभैः॥स्वस्थानंप्राप्य
विप्रर्षिःस्वश्रमस्याराधनंप्रति॥यत्नंप्रकुरुतेनित्यंद्वादशीव्रततत्परः॥ततोवर्षशतेपूर्णेगता
द्वारवतीनरः॥प्राणान्स्वश्लोपदेशेनत्यक्त्वामोक्षंजगामह॥इंद्रद्युम्नतवाख्यातंमाहात्म्य
द्वारकासुच॥सर्वफलमवाप्नोतिस्वक्षेत्रकथितंचयत्॥पुनरेवप्रवक्ष्यामियत्त्वेमनसिरो
चते॥१९॥एवंतांपवतांचैवमाहात्म्यंद्वारकासुच॥सर्वफलमवाप्नोतिस्वक्षेत्रकथितं
चयत्॥२०॥विस्तारयंतिलोकेस्मिन्लिखितंयस्यवेश्मनि॥श्वत्संद्वारकापुण्यंप्राप्स्यति
त्वक्षसंभवं॥२१॥इतिश्रीसोपर्णद्वारकामाहात्म्येचंद्रशर्मोपाख्यानंसमाप्तः॥२४॥कथय
स्वमुनिश्रेष्ठकिंचिकौतूहलंमम॥पुण्यंपवित्रंपापघ्नंतीर्थंत्रिविदिवस्तारात्॥१॥श्रीमार्कंडेय

151/1964

उवाच॥मथुराद्वारकायोध्याकलिकालेपुरीत्रयं॥धर्मार्थकामदानूपमोक्षदाहरिवल्ल
भा॥मथुरायांतुकालिंदीगोमतीत्वत्समंनिधौ॥अयोध्यायांतुसरयूमुक्तिदासेवितात्त
मा॥३॥अयोध्यायांविष्णुहरि॥द्वारकांत्वत्सरेवहि॥मथुरायांतुविश्रांतंस्मृत्वामुक्तिमवा
प्नुयात्॥४॥धन्यासामथुरालोकेतत्रजातोहरिःस्वयं॥द्वारकासफलालोकेक्रीडितंयत्र
विष्णुना॥५॥धन्यानामपिसाधन्याअयोध्यासर्वकामदा॥सास्वयंरामदेवेनपालिताधर्म
बुद्धिना॥६॥यद्ददातिफलंकाशीसेविताकल्पसंख्यया॥कलौददातिमथुरावासरेणा
पितत्फलं॥७॥मन्वंतरसहस्रेषुअयोध्यायांयत्फलंलभेत्॥निमिषार्द्धेनवसतांद्वारकायांतु ७८
तत्फलं॥८॥घनासेचकुरुक्षेत्रेयत्फलंवत्सरैःशतैः॥वसतांनिमिषार्द्धेनअयोध्यायांचतत्
भवेत्॥१०॥कीर्तनेनापिमथुराद्वारकापुरी॥अयोध्यागमनेनापित्रिभिःशुद्धंपदंव्रजेत्॥११॥

॥त्वत्समंस्वयंतुवंदेवंद्वारकात्रिदिवोपमा॥श्रुत्वावाप्यथवादृष्ट्वाकृतेजन्मसंक्षयं॥१२॥कृतानि
लिखितानादृष्टाअयोध्यामथुरापुरी॥पापंहरतिकल्पोत्थंद्वारकाचतृतीयका॥१३॥त्वत्समंविष्णुह
रिंदेवंविश्रांतंचकलौस्मृतं॥द्वादशीजागरेरात्रौवाजिमेधशतंफलं॥१४॥बालक्रीडनकंस्थानं
येस्मरंतिदिनेदिने॥स्वर्णशैलप्रदंपुण्यंलभंतेराजसत्तम॥१५॥धन्यास्तेमानवालोकेकलिका
लेपुरोत्तम॥अथवंसिंधुतोयेनगोमत्यांयैःपुनःस्नातं॥१६॥पश्चिमाशांनरःस्नात्वानत्वावैक
रसंपुटं॥द्वारकांयेस्मरिष्यंतितेषांकोटिगुणंफलं॥१७॥मनसाचिंतयेद्योवैकलौद्वारवतीपु
रीं॥कपिलायुतपुण्यंचलभंतेहेलयानरः॥१८॥गंगासागरजंपुण्यंगंगाद्वारभवंतथा॥कलौ
द्वारवतींगत्वाप्राप्नोतिमनुजाधिप॥१९॥सप्तकल्पस्मरोनृपमार्कंडेयोमुनिसत्तमः॥सामान्या
बाधिकावापिकलौद्वारवतीपुरी॥२०॥डुवसिसासमोधन्योनास्तिनास्तितपोत्तमः॥भारती

153/1954

बंधनंऋत्वाद्वारकांविधृतोहरिः॥२१॥माकाशीमाकुरुक्षेत्रंप्रभासंमाचपुष्करं॥द्वारकांगछ
राजर्षिपृश्यपक्षमुखंध्रुवं॥२२॥अश्वमेधसहस्रंतुराजसूयशतंकलौ॥पदेपदेचलभतेद्वार
कांगछतोनरः॥२३॥सफलंजीवितंतेषांकलौरूपवरोत्तम॥येषांनस्खलतेचित्तंद्वारकोपरि
गछतां॥२४॥मातावपुत्रिणीतेनपितापुत्रीपितामहाः॥पिंडदानंकृतंयेनगोमत्यांश्राद्धसंनिधौ
॥२५॥गोपीचंदनमुद्रांतुकृत्वाभ्रमतिभूतले॥सोपिदेशोभवेत्पूतःकिंपुनर्यत्रसंस्थितं॥२६॥
द्वारकायांसमुद्भूतांतुलसीश्राद्धसेवितां॥नित्यंबिभर्तिशिरसासभवेत्रिदशांपतिः॥२७॥देवा
रेभगवान्तिष्ठिश्चविजयानीरंचगंगोद्भवंनित्यंकाशीपुरीतथाचतुलसीधात्रीफलंवद्दनं॥शा
स्त्रव्यासकृतंतथाचदयितंरामायणंद्वारकापुष्पंमालतिसंभवंचदयितंगीतंकृतंजागरे॥२८ १९
॥गृहेयस्यसदातिष्ठेत्गोपीचंदनमृत्तिका॥द्वारकातिनेतत्रकृष्णेनसहिताकलौ॥२९॥कृत

ह्मोवाथगोघ्नोपिहेतुकःसर्वपापकृत्॥गोपीचंदनसंपर्कात्पूतोभवतितत्क्षणात्॥३०
॥वर्णश्चैदैर्मुनिश्चैदैविद्यतेजगतःपतिः॥नामादिकस्तुदेवोसौरूपश्चैसंस्थितःप्रभुः॥संहा
रंकुरुतेसोवैदेवदेवोजनार्दनः॥३१॥अभिन्नोभिद्यतेसोवैएकएवजनार्दनः॥नलिप्यतेकर्म
णासौहेतुभूतेप्यवस्थितः॥३२॥यदायदाहिधर्मस्यग्लानिंसमुपजायते॥तदातदाहृषीके
शआत्मानंसृजतिप्रभुः॥३३॥परित्राणायसाधूनांविनाशायचदुःकृतां॥धर्मसंस्थापनार्था
यजायतेसोयुगे॥३४॥क्रीडया---क्रीडाभिःलीलयानेकरूपया॥मोहयन्सर्वसत्वानि
ययाजगतःप्रभुः॥३५॥कालचक्रं-चक्रंयोगचक्रंचकेशवः॥आत्मयोगेनभगवान्परिव
र्त्तयतेनिशं॥३६॥कार्कपैवहिमत्स्योप्यजंगमाजंगमस्यच॥पुंसःसभगवानेकःसव---
-ग्रहं॥३७॥नटीवबहुरूपाणिधारयन्नात्मनःप्रभुः॥कुरुतेलौकिकंकर्मलोकान्संमोह

155
1964

यन्निव॥३८॥यःप---- विद्दैव------ यस्माज्जायतेच्यु
तः॥नवईशानस्यमू------ कीनाशाः
वडबल॥तेनवंचयते-- तानांवस्तुत्वा----
------ उतिकःशब्दपश्चनिःकर्मवाचकः॥तस्यत्वभावयोगाच्च
तस्मोभवतिशाश्वतः॥४०॥पुंडरीकंपरंधाममनित्यमक्षरमव्ययं।तेनेवंपुंडरीकाक्षःउ--
--मः॥४१॥------ अमतश्चैवमतस्यत्रभवाव्ययः॥मात्सप्रतिष्ठितःसत्यःसत्यःसत्रप्र
तिष्ठितं॥४२॥सत्वसंस्थश्चगोविंदोतस्मात्सत्ये-- --तः॥विष्णुर्विक्रमणादेषजय
नाजिष्णुरुच्यते॥४३॥शाश्वतंस्थानंतश्चगोविंदस्ततोभवेत्॥ अना मनोम्भा ८०
वगीयतेभगवान्हरि॥४४॥हरिश्चैवपरोदेवःपरमात्माजनार्दनः॥मायापाशाशानेविष्णुःका

मक्रोधपरायणाः॥४५॥नजानंतिहृषीकेशंपुराणंपुरुषोत्तमं।देहिनस्तेनमुह्यंतितेषां
जन्मनिरर्थकं॥४६॥येषांवैपुंडरीकाक्षोहृदयेनावतिष्ठति॥यमस्यचवशामायांतिकाम
मूढाःपुनःपुनः॥४७॥बद्धनेत्रयथैवांधानीयमानाःस्वकर्मभिः॥एषएकायनःपंथायेनयां
तिमनीषिणः॥४८॥तंदृष्ट्वामन्यमन्येतिमहास्तत्रनमुह्यति॥एतत्ज्ञानंविदुर्विप्राध्रुव
मिंद्रियधारणं॥४९॥एतत्ज्ञानंचयोगंचयेनयांतिमनीषिणः॥अप्राप्यकेशवंविप्राःइं
द्रियैरजितैर्नरैः॥५०॥चागमाधिगतोयोगात्सततेनप्रसीदति।विद्यातमभिजानातित्रि
युगंमधुसूदनं॥५१॥कर्त्तारिमक्षतंदेवंभूतानांप्रभवाव्ययं॥नकलौसंभवस्तस्यत्रियुगो
मधुसूदनः॥५२॥उवाभिमागिरावद्धोद्वारवत्यांवसेद्धरिः॥क्षरयंतियोगिनोयंवैएकांत
मनमानसा॥५३॥तदेवपरमंधामतदेवपरमंपदं॥द्वारकामाउवैधन्यायत्रास्तेमधुसूद

157/1964

न:॥५५॥द्वात्रिंशद्योजनंक्षेत्रंपरमंतुहरे:स्मृतं॥गुप्तानियत्रतीर्थानिहृद्यान्यथान्विता
निच॥५६॥प्राप्तेकलियुगेघोरेसमुद्र:प्लावयिष्यति॥पंचगव्यूतिमात्रंतुनिवासस्तुहरे:स्मृ
त:॥५७॥स्वर्णप्राकारसंयुक्तास्वेच्छयासादृशोभिता॥बहुरत्नसमाकीर्णासमुद्र:प्लाव
यिष्यति॥५८॥तत्रस्यतेजसासर्वंहृव्याप्तिविशेषत:॥उत्तरंतुपुरंक्षेत्रंमुक्तिस्थानपरंस्मृ
तं॥५९॥तत्रमुक्तिपराप्रोक्तासर्वेषांप्राणिनांतुवि॥कुशस्थलीतिसापूर्वंपश्चाद्वारवती
हिसा॥६०॥तत्पश्चात्स्थापितायस्मात्स्थितादशमूर्त्तिका॥द्वादशात्माहृषीकेशस्तस्मान्नि
हित:सदा॥६१॥विनाद्वारेणवैयांतिनरानिर्धूतकल्मषा:॥वासुदेवपरंधामयत्रगत्वान
शोचति॥६२॥तस्मिन्क्षेत्रेस्थितायेचअपिकीटपतंगका:॥मृत्युकालेपितेयांतितद्विष्णो ८२
:परमंपदं॥६३॥सर्वेचतुर्भुजानूत्वावैष्णवा:द्विजसत्तमा:॥तत्रस्थितास्तुयेदृष्टानेपित

स्मिन्व्रजंतिवै॥६४॥त्रैलोक्यास्तेजगत्स्रष्टातेचधन्यतराद्विजा:॥मोक्षादिनिरमक्षेत्रे
द्वाद्वारवत्यांवसंतिये:॥६५॥इतिश्रीब्रह्मादोक्तसंहितायांश्रीद्वारकामाहात्म्येपंचविं
शोध्याय:॥ ॥७॥ ॥ब्रह्मोवाच॥ ॥एतद्व:कथयिष्यामिरहस्यंपरमंहरे:॥यथासेषमा
यातियथासंज्ञायतेविभु:॥१॥चक्रतीर्थेतुस्नानात्द्वादशफलप्रपोषका:॥रात्रौजागरयुक्ता
तेषांतुष्यतिकेशव:॥२॥यथास्मृक्तातथाप्रष्टाविशेषोनास्तिकश्चन॥अन्नेददर्शनास्त्वेवे
विशंतिपदमव्ययं॥३॥यथागो:श्रुक्रस्प्रष्टेवायथावावेदविद्विजा:॥संतारयतिदातारंद्वाद
शफलयतस्तथा॥४॥नतथापावनेदानंतपयज्ञोनहवींषिच॥यथातुपावनीप्रोक्ताद्वाद
शीपक्षयोर्द्वयो:॥५॥हरिर्द्दिनसमुत्तुक्तस्ययस्ययातिमहीतले॥तस्ययागफलंप्रोक्तंयति
र्मिसमुद्भवं॥६॥यथामंत्रासहथाश्वमेधाकर्मव्यवस्थित:॥येत्वृक्तामाधवदिनेदेहपी

159/1964

वरदेतवे॥७॥यानिलोकोत्तमानीहपवंतिम्मतवानितः॥तेषांफलमवाप्नोतियेनभु
क्तोहरेर्दिने॥८॥अन्नंतुलवणंप्रोक्तंपार्वतीवासरेद्विजाः॥पृथ्व्यांतैलंद्विजश्रेष्ठाअसंगे
परिवर्जयेत्॥९॥क्षीरंभ्रमेवनंदुष्टंसंप्राप्तेचेंदुसंक्षये॥अद्वैस्तुपूर्णिमास्यायामुरायां
रविसंक्रमे॥१०॥पित्रिनंवाष्टमिदिनेअन्नंनोक्तुंहरेर्दिने॥कर्त्तनंनखरोमाणांन्हृतायां
परिवर्जयेत्॥११॥दौर्गिपमायुषोध्वंसःकष्टप्राप्तिरिहाश्रयः॥धवासश्चस्मृतिध्वंसःक्रमे
णैतत्प्रवर्त्तते॥१२॥विमुक्तनारकादुःखक्रमेणैतत्प्रवर्त्तते॥अतोनभक्षयेदन्नंसंप्राप्ते
हरिवासरे॥१३॥सर्वस्मिस्त्वापिविप्रेंद्राःपरंनिर्वाणमाक्रयात्॥वैष्णवोपिबहिर्वैयोयेभुं
क्तेहरिवासरे॥१४॥विपत्तिरपिसाप्नोत्याघाविष्णवार्थेनवेष्णणां॥व्याजेनापीहविप्रेंद्राल्लंघ
नंहरिवासरे॥१५॥स्नतंमार्जयितेलेखंचित्रगुप्तपटस्थितं॥एकादश्यांहरिदिनेतस्मादन्नं

नभक्षयेत्॥१६॥तावत्पापानिदेहेस्मिन्तिष्ठंतिमनुजाधिप॥यावन्नोपासतेजंतुर्वास
रंसर्वपावनं॥१७॥नियमंयस्तुवैकुर्यात्द्वादश्यानयतस्तथा॥सर्वतीर्थमयोदेहःतत्क्ष
णात्संप्रजायते॥१८॥हरिर्हरीतकीयेषांलंघनंद्वादशीषुच॥कलेःपापमलौघस्यसंजातंभे
षजंमहत्॥१९॥कलौत्वतयुगस्तेषांक्लेशास्तेषांसुखवहाः॥येषांशारीरयहणेहरिरुच्चा
रणेमतिः॥२०॥तपःपरंकृतयुगेत्रेतायांधर्मइष्यते॥द्वापरेयज्ञमेवाहुःदानमेकंकलौयु
गे॥२१॥विष्णोरुद्दिश्ययद्दानंदीयतेब्राह्मणोत्तमे॥दुर्लभंतत्परंप्रोक्तंप्राप्तेकलियुगेद्विजाः॥
२२॥तस्मिन्कलियुगेघोरेक्रियायोगपरायणाः॥धन्याधन्यतरास्तेवैनित्यंब्रह्मस्ववर्जनाः॥
२३॥ब्रह्मप्रियतरास्तेषांब्रह्मस्वशरणंगताः॥सदासंजायतेषांतेषांभक्तिरव्यभिचारिणी॥
२४॥प्रयांतिपरमंधामवासुदेवाख्यमव्ययं॥ग्रामायालंजलंवक्रेस्तमसोनास्करोदयः॥२५॥

161/1964

॥ध्वांतिकल्मेरप्योघस्यनामसंकीर्त्तनंहरेः॥श्रूयतेकिलगोविंदेभक्तिमुद्वहतांनृणां॥२६॥
विघ्नोच्छित्तानीर्घ्यानार्थविमुक्तेःपरिपंथिनः॥आयासस्मरणात्कोस्यस्मृतोयच्छतिशोभनं
॥२७॥पापक्षयश्चभवतिस्मरतांअहर्निशं॥शारीरारोग्यधर्मार्थविषयांश्चानुषंगिकान्॥
२८॥ददातिध्यायतांनित्यंअपवर्गप्रदोहरिः॥अतएवहिशक्राद्याःदेवताःपरिपंथिनः॥२९॥
शतैःसहस्रशोविघ्नैयतंतेविघ्नहेतवः॥नयत्रस्मनकर्त्तव्यःतस्माराधनतत्परैः॥३०॥ध्यात
व्यंसततमाम्नायमानवैःसजितेंद्रियैः॥गंभीरःपरमोदेवःसिद्धानामप्यगोचरः॥३१॥कीर्त्ति
तःसंस्मृतोध्यातःपूजितःसंस्थितस्तथा॥एकाहिकामुष्मिकींरक्षांकरोतिभगवान्हरि
:॥३२॥तस्मात्कलियुगेघोरेस्मर्त्तव्योहरिरव्ययः॥द्वादश्यामुपवासस्यएषधर्मःपरःस्मृतः॥ ८३
३३॥किंपुनर्देवदेवस्यतत्समायेतुजागरं॥हर्षेणामहताविष्टाउद्भूतपुलकास्तथा॥३४॥

॥कुर्वंतिनृत्यमानास्तुवह्वाश्चर्यसमन्विताः॥वैशाखमासेसंप्राप्तेशुक्लपक्षेद्विजोत्तमा 163/1964
॥३५॥एकादश्यांनिराहाराःस्नात्वैकमतमानसाः॥प्रादुर्भावास्वकैःपुष्पैःपुण्यानिपव
नेनच॥३६॥पटहैर्वेणुवीणाद्यैःगीतवाद्यैरनेकशः॥तालशाश्टमैर्नमस्कारैर्जयश
ब्दैस्तथैवच॥३७॥धूपंनैवेद्यदानंचप्रदेयंचपुनःपुनः॥पूजयित्वातुदेवेशंदिव्यैःपुष्पैम
नोरमैः॥३८॥नैवेद्यंसर्पिषायुक्तंदापयित्वाच्युताग्रतः॥फलंनानाविधंदत्वास
क्षन्यंसदीपकं॥३९॥पूर्वोक्तेनविधानेनद्विपाजागरमारभेत्॥चत्वारोयामिनीया
मानयेज्जागरेणैनतु॥४०॥निरीक्षमाणांस्तस्यमुखपद्मंपुनःपुनः॥अपराधसहस्रा
णित्तक्षसंदर्शनेनतु॥४१॥विनाशंयांतिविघ्नेशाःतमःसूर्योदयेयथा॥भक्तियुक्तो
पियःपश्येत्हीनवर्णोपिमानवः॥४२॥गत्वासविरजान्लोकान्पुनःप्राप्नोतिविप्रतां॥

॥एकोपिकृष्णस्यकृतःप्रणामोदशाश्वमेधावभृथेनतुल्यं॥दशाश्वमेधीपुनरेतिजन्मकृ
ष्णप्रणामीनपुनर्भवाय॥४४॥किंपुनर्जागरंयेतुदेवदेवस्यसंनिधौ॥कुर्वंतिभक्तिसंयु
क्तास्तेषांस्वर्गःकरेस्थितं॥४५॥विनासांख्येनयोगेनविनाचेंद्रियनिग्रहात्॥विनाज्ञाना
न्विनाध्यानात्तेयांतिपरमंपदं॥४६॥मेरुदरतुल्यानिङ्कृतानिबहून्यपि॥कृतेजा
गरणेशीघ्रंप्रदह्यंतेतूलराशिवत्॥४७॥यानिकानिचपापानिब्रह्महत्यादिकानिच॥
कृष्णस्यजागरेतस्मिन्विलयंयांतिखंडशः॥४८॥एकतःसर्वयज्ञाश्चतीर्थैःसर्वसमन्वि
ताः॥एकतोदेवदेवस्यजागरःकृष्णवल्लभः॥४९॥नसमंकुर्वतांप्राङ्ग्अधिकःकृष्णजा
गरः॥चत्वारोवार्षिकामासायेनकृष्णःप्रसीदति॥५०॥तत्रब्रह्माचरुद्रश्चशक्राद्यादेव ८४
तागणाः॥नृत्यंतस्तत्रमायांतिजागरेकृष्णसंनिधौ॥५१॥ऋषयोनारदाद्याश्चसमाया

185/1964

याहरिर्दिने॥अहंचतत्रगच्छामिकृष्णप्रजननतत्परः॥५२॥काशीचपुष्करंचैवप्रयागंपुण्य
नंदी॥उडुंबरवनंचैवअर्बुदारण्यमेवच॥५३॥सूकरंमथुकंमथुचैवसर्वतीर्थानि
चैवहि॥यज्ञावेदाश्चचत्वारोगच्छंतिहरिजागरे॥५४॥गंगासरस्वतीरेवायमुनावैशतक्
द्रा॥चंद्रभागावितस्ताचनद्यःसर्वाश्चतत्रवै॥५५॥सरांसिचह्रदाःसर्वेसमुद्राःसर्वएवहि
॥एकादश्यांद्विजश्रेष्ठागच्छंतिहरिजागरे॥५६॥स्वर्हणीयादिदेवानांयेनराःकृष्णवल्ल
भा॥नृत्यंतिगीतंकुर्वंतिवीणावाद्यंतथैवच॥५७॥तालजशब्दमृदंगैश्चपटहानांचनिःस्व
नैः॥मंगलैश्चविवादैश्चस्तोत्रैर्नानाविधैस्तथा॥५८॥सतालवीणासहवाद्ययुक्तासंहृष्ट
नैवेद्यसदीपधूपैः॥विधूयकर्माणिशुभाशुभानिगच्छंतिलोकंपरमंमुरारेः॥५९॥कथमि
हपराभवेयुःपुरुषवरेपुरुषाश्रयप्रयुक्ताः॥नहिजागर्तिचतुर्भुजाश्रयाणांत्रिदशाद्हास्ति

वरप्पदाविशिष्टः॥६०॥ इतिश्रीप्रह्लादोक्तसंहितायांश्रीद्वारकामाहात्म्येजागरमाहात्म्यं
नामषड्विंशोध्यायः॥ ॥छ॥ ॥प्रह्लाद उ०॥ योमृत्तिकांद्वारवतीसमुद्भवांकरेसमादाय
ललाटपट्टे॥ करोतिनित्यंमनशुद्धिहेतोःक्रियाफलंकोटिगुणंसदाभवेत्॥१॥ क्रियाविही
नोयदिमंत्रवर्जितंश्रद्धाविहीनोयदिमंत्ररंजितं॥ श्रद्धाविहीनोप्यनुकालहीनःसभायते
लोकयगोपिचंदनं॥२॥ गोपीचंदनसंभवंसुरचितंपुंड्रंललाटेयदिनित्यंधारयतेद्विजोद्वि
जपुटेरात्रौदिवासर्वदा॥ यस्याक्रंकरुजांगलेरविग्रहेमाघ्यांप्रयागेसदा॥ तस्याप्नोतिर
खगेंद्रविष्णुसदनेसंतिष्ठतेदेववत्॥३॥ यस्मिन्गृहेतिष्ठतिगोपिचंदनंभक्त्याललाटेम
नुजोबिभर्ति॥ तस्मिन्गृहेतिष्ठतिसर्वदाहरिःश्रियान्वितःकंसनिहाविहंगम॥४॥ मोक्ष ८५
रयेत्सप्तपुरीसमुद्भवामृदःपवित्राकलिकालहंत्र्यः॥ नित्यंललाटेहरिमंत्रसंयुतंयमेन

167
1964

पत्रेपदपिपापसंभूतः॥५॥ यस्यांतकालेखगगोपिचंदनंबाहूललाटेहृदिमस्तकेच॥ प्र
यातिलोकंकमलाटेहरिलालयाप्रभोःयदिबालघातीयदिब्रह्महास्यात्॥६॥ स्नात्वाल्ला
टेतिलकंचयेस्तुवंकरोतिकर्मपितृदैवमानुषं॥ श्रद्धादिविहीनंयदिकालवर्जितंचाकल्प
यावद्भवतेतदक्षयं॥७॥ ग्रहानपीडंतिनराक्षसागणाःयक्षाःपिशाचोरगभूतदानवाः॥ ल
लाटपट्टेखगगोपिचंदनंसंतिष्ठतेयस्यहरेःप्रसादात्॥८॥ भवंतिरोगानभवंतिव्याधयोन
श्यंतिदोषाइहपूर्वसंचिताः॥ ललाटदेशेखगगोपिचंदनंकुर्यात्सुपार्श्वेतिलकंयदाभवेत्
॥९॥ आचारहीनोयदिबालघातकोविश्वंभघातीगुरुदारधंसक॥ सर्वाणिपापाण्यपका
रयेद्योधुनोतिगोपीजनचंदनेन॥१०॥ श्मशानदेशेषयस्तेजसंनिधौकरोतिमूत्रंपथिनि
समंकृतं॥ प्रयातिगोपीजनचंदनांचितोगतोगृहंमुरारेर्यदिपापमुक्तयः॥११॥ यःश्राद्धका

लेखगगोपिचंदनंदद्यातिपिंडेषुयथभक्तिभावितं॥द्विजेषुचवीविधिवत्करोतिलभतेसम
यपितरस्त्रिविष्टये॥१२॥इतिश्रीगोपीचंदनमाहात्म्यंनामसप्तविंशोऽध्यायः॥ ॥छ॥ ॥
श्रीप्रह्लादउ॥निहतेकौरवेसैन्येसर्वेयोधक्षयंगते॥अर्जुनोभक्तियुक्तात्मागतःश्रीब्रह्म
संनिधे॥१॥प्रदक्षिणांततःकृत्याप्रणम्यशिरसाभुवि॥कृतांजलिपुटोभूत्वाइदंवच
नमब्रवीत्॥२॥अद्यापिसंशयंत्वस्तिहृदयेममवर्त्तते॥शंखोद्धारकइत्येषतन्माहात्म्यंश्रृ
णोम्यहं॥३॥शंखिनोदर्शनादेवकिंपुण्यंउकुशेश्वरे॥रुक्मिणीकुंडदेवेशकिंपुण्यंप्रियमे
लके॥४॥त्रिलोचनेतुकिंपुण्यंकिंपुण्यंउकलिंजरे॥श्रीभगवानु॥साधुसाधुमहाबाहो
यत्वयापरिपृच्छसि॥५॥अहंतेकथयिष्यामियस्तुरेरपिदुर्लभं॥यस्यास्मरणमात्रेणसर्व ८६
